1272

Incomplete

C Brahmasūtra Bhāṣya

			Title
		Bhaskara	Author
			Editor
			Year, Vols.
SK			Publisher
1272			Remarks

भा. १

श्रीगणेशाय नमः॥ जन्मबंधविनिवृत्तिकारणं ब्रह्मसूत्रमिदमुरु भौ यतः॥ श्रौतचित्रकमलै
कभास्करं बादरायणमृषिं नमाम्यहम्॥१॥ सूत्राभिप्रायसंवृत्त्या स्वाभिप्रायप्रकाशना
त्॥ व्याख्यातं यैरिदं शास्त्रं व्याख्येयं तन्निवृत्तये॥२॥ अथातो ब्रह्मजिज्ञासा॥ चतुर्थ्यर्थे
ष्वथशब्दप्रयोगो दृश्यते। यथाऽनंतर्ये भुक्त्वाऽथ व्रजति यथा पूर्वं किंचिदुक्त्वा विकल्पां
तरं कर्तुमिच्छन्नाह अथायमभिप्राय इति। पथ्यामांगल्ये॥ ॐकारश्चाथशब्दश्च द्वावे
तौ ब्रह्मणः पुरा॥ कंठं भित्वा विनिर्यातौ तस्मान्मांगलिकावुभाविति॥ यथाधिकारे अ
थशब्दोऽनुशासनमिति॥ तत्र नाधिकारार्थो ब्रह्मजिज्ञासाया अनधिकार्यत्वात् ना
पि मंगलार्थो मंगलस्य वाक्यार्थेऽन्वयाभावात्॥ पटहध्वनिवत्तस्य श्रवणमात्रगम्यत्वात् पूर्व
वृत्तापेक्षायाश्चेयाश्चानंतर्याव्यतिरेकात्॥ आनंतर्यार्थ इह गृह्यते॥ तत्र किमपि पूर्ववृ
त्तं वक्तव्यम्। तदुच्यते पूर्वं कर्मविचारो वृत्तोऽनंतरं ब्रह्मजिज्ञासा प्रारभ्यते। अत्राहुः नायं व १

त्र वर्त्तिष्यमाणे संबंध उपपद्यते धर्मजिज्ञासायाः प्रागप्यधीतवेदांतस्य ब्रह्मजिज्ञासो
पपत्तेः न चात्र क्रमस्य प्रतिपादकं प्रमाणमस्ति यथा हृदयस्याग्रेऽवद्यति अथ जिह्वा
या अथ वक्षस इति न चांगांगिभावः यथाजादिवन् नाप्यधिकृताधिकारो गोदोहनादिवत् ब्रह्म
जिज्ञास्यफलभेदाच्च अभ्युदयफलं धर्मज्ञानं निःश्रेयसफलं ब्रह्मज्ञानं भव्यश्च धर्मस्तत्र जिज्ञास्यः
सिद्धरूपं ब्रह्म चोदनाप्रवृत्तिभेदाच्च अनुष्ठानपर्यवसायिनी तत्र चोदना ब्रह्मचोदना पु
नरवबोधपर्यवसायिनी नानुष्ठाने प्रवर्त्तयति यथा प्रत्यक्षादिप्रमाणं स्वरूपावबोधकं।
न प्रवर्त्तकमेवं तत्त्वमस्यादिवाक्यं स्वरूपावबोधकं न प्रवर्त्तकमिति यद्येवं कस्य तर्हि समानं
तर्यमुच्यते। नित्यानित्यवस्तुविवेकः शमदमादिसाधनसंपत् इहामुत्रफलोपभोगविरागो
मुमुक्षुत्वं चेति एतत्सर्वं यत्समेतं तदानंतर्यमथशब्देनोच्यते सत्येतस्मिन् साधनचतुष्टये ब्रह्म
जिज्ञासोपपद्यते नान्यथेति अतःशब्दो हेत्वर्थः यतः श्रुतिरेव कर्मफलानित्यत्वं दर्शयति तद्यथे
ह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति ज्ञानस्य चामृतफलत्वं दर्श
यति ब्रह्मविदाप्नोति परमिति अतो हेतोर्ब्रह्मजिज्ञासा कर्तव्येति अत्र ब्रूमो यत्तावदुक्तं धर्मजि

मो॰ २
२

शासायाः प्रागपि ब्रह्मजिज्ञासोपपत्तेरिति। तदयुक्तं अत्र हि ज्ञानकर्मसमुच्चयात्मोक्षप्राप्तिः
सहकारस्याविशेषात् तथा च वक्ष्यति सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति कर्मणि चापरिज्ञाते
विद्यायाः केन समुच्चयः केन नेति विभागो न शक्यते वदितुं हेयोपादेयप्रतिपत्त्यभावात्। एवं च ते
तु कर्मज्ञाने काम्यं प्रतिषिद्धं च हेयं नित्यनैमित्तिककर्मणा समुच्चय इति प्रतिपादयितुं शक्यते कर्मसमु
च्चयान्निवोढ्याद्युपासनान्यत्र चिंत्यंते तेषां च कर्माधिकृतपुरुषविषयत्वात्। अविज्ञाते तु
कर्मणि चिंता नोपपद्यते एवं तु धर्मजिज्ञासा कर्तव्या पुरुषमात्रविषयत्वात् स्वाध्यायवि
धेश्चार्थावबोधपर्यवसानात्॥ अधीतवेदस्य गुरुकुले तिष्ठतोऽर्थावबोधोऽवश्यं भावीति ब्रह्मज्ञा
नं तु मुमुक्षोः कस्यचिदेव न च गुरुकुल एव वसतः कस्मादुपायांतरसापेक्षत्वात् यज्ञेन दानेने
ति तथा शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्येदिति विहितमुपायां
तरं न च स्वाध्यायविधिरुपायांतरमाक्षेप्तुं क्षमः पुरुषांतरे च कर्मावबोधसमर्थे चरितार्थ
त्वात्। आत्मनश्च दुर्विज्ञेयत्वात् अंतःकरणस्य च रागाद्युपहतवृत्तित्वात् श्रवणायापि बहुभिर्यो २
न लभ्यः शृण्वंतोऽपि बहवो यं न विद्युः आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानु

शिष्ट इति दर्शनात्। एकमेवाद्वितीयं अहं ब्रह्मास्मीति चान्वेदज्ञानानुत्पत्तेः। तस्मिन्निवृत्ते त
ज्जिज्ञासानिवृत्तौ प्रसज्यमानायां प्रतिपन्नाश्रमांतराणां चतुर्णामप्याश्रमिणामविशेषणावेदां
तविधिकारित्वं ब्रह्मजिज्ञासेयं प्रस्तूयते कोऽसौ विधिः श्रोतव्यो मंतव्यः सोऽन्वेष्टव्यः स विजिज्ञा
सितव्यः तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्। महाभ्यो त्रिया इति दर्शनात्। ननु स्वाध्यायोऽध्येतव्य
इति श्रवणे स्वाध्यायने प्रवृत्तिः अध्ययनेन सति वेदार्थश्रवणे प्रवृत्तिरितीतरेतराश्रयदो
ष इति चेत् नैतदेवं अध्यापनविधिकारितं च श्रवणं हि वानपाः स्वीकरणं तथाध्यापनविधिप्र
युक्तं उक्तं च उपनीय गुरुः शिष्यं वेदमध्यापयेदिति शिष्याचार्यसंबंधस्यानादित्वादित्यौत्तावर्ण
सहस्रेष्वपि स्यादिति नानवस्थादोषः॥ श्रवणे चाभिप्रवृत्तस्य कोऽसावात्मेत्यपेक्षायां स्वरूपावबोधौ
धपराण्यमिदं सर्वमित्यादीनि प्रतिवेदांतं प्रवर्त्तंते विहिते चात्मतत्त्वे प्रत्ययावृत्तिलक्षणं तदुपासनमु
पदिश्यते। निदिध्यासितव्यो विज्ञाय प्रज्ञां कुर्वीतेति कर्मोपासनयोश्च समुच्चयो वक्ष्यते अ
भेदज्ञानमभ्यस्यमानमज्ञानवासनामुच्छिनत्ति रागादिवासनां च कर्म पुनः कर्मवासनाभिस्तु

नत्वीत्युपदिष्टात्तस्यास्तित्स्वाध्यायविधिकारिता इतरविधिकारितावास्तु ब्रह्मजिज्ञासा।
भट. सर्वथा धर्मजिज्ञासायाः पूर्वभावित्वं सिद्धं तस्मात्पूर्ववृत्ताद्धर्मजिज्ञासा। इत्यनंतरं ब्रह्मजिज्ञासेति
३ युक्तं यदप्युक्तमंगाणि भावाभावादिति तदप्यसिद्धं कर्मसमृद्ध्यर्थिनो यजमानस्योद्गीथा
द्युपासनानां विहितत्वात् लोकेषु पंचविधं सामोपासीतेत्यादीनां च कर्माधिकृतस्यैव। स्यु
द्यत्विनो विधानात् गोदोहनादिवत्। यदप्युक्तं फलजिज्ञास्यभेदादिति। तदपि यस्युक्तं समुच्च
याभ्युपगमात्। केवलकर्मणां वाभ्युदयफलं धर्मज्ञानमिष्टमेव जिज्ञासान्तरश्चो इना प्रवृत्तिने
दृश्चास्मत्सद्दे पिनविरुध्यत इति न किंचिद्दूषणं पश्यामः। नित्यविवेकादयोंऽतःकरणधर्माः
सर्वेन्नप्रकृताः स्वशब्देन चानिर्दिष्टाः कथमिव सत्रकारस्य विवक्षिता इति प्रतिपत्तुं शक्यते
तेषामनवस्थितत्वात्। यदप्युक्तं कर्मणां क्षयित्वं ज्ञानस्य च निःश्रेयससाधनत्वमतःशब्देन व्य
पदिश्यत इति। तदसत् अतःशब्दो हि वृत्तस्यापदेशको हेतुर्पतया। यथा क्षेमः सुभिक्षोपन्नतोह २
मस्मिन्देशे वसामीति स्ववाक्योपात्तस्य अपादा गम्यमानस्य हेतुत्वं वदति तद्वदेव कर्मजित इ

त्ति केवलस्य कर्मणः क्षयित्वमुच्यते न ज्ञानसहकारिणः। तथा च श्रुतिः स य आत्मानमेव लोक
मुपास्ते न हास्य कर्म क्षीयत इति। अतः क्षीणस्यापि कर्मणो ज्ञानरसविद्धस्यापि फलत्वा
त्क्षीयत इत्युच्यते। कथमयमर्थो गम्यते तदस्याप्यतः क्षीयत इत्यनेवंविदः कर्मक्षयस्य
भिधायात्मविदस्तदभावप्रतिपादनपरत्वाद्वाक्यस्य। तस्मात्पूर्ववृत्तस्य कर्मज्ञानस्यातःशब्दे
नोपदिश्यते हेतुत्वं तत्राभयत्र ब्रह्मज्ञानं प्रति हेतुत्वमारंभे फलप्राप्तौ च कर्माणि पूर्ववृत्तेतदपे
क्षा ब्रह्मजिज्ञासा कर्तुं शक्यत इति। आरंभे हेतुत्वं कर्मणां समुदितं ज्ञानं क्षेमप्राप्तिनिमित्तमि
त्ति फलप्राप्तौ हेतुत्वं अन्ये पुनरन्यथा संबंधं वर्णयंति वेदाहि ब्योऽनधीनभावः पूर्ववृत्तः प्रशाक
षायपरीपाकश्च एतदनंतरमर्थमथशब्देनोच्यत इति। कथं वेदेन क्षिप्तबुद्धिः पूर्वस्वाध्यायाध्याय
नप्रवृत्तिपुरुषः कर्मण्येव प्रवर्तते। ततः शोधनीयेन सर्गे केवासनयोर्भवाभिनवौ॥ ततश्च
पुण्यापुण्ययोरुपचयापचयौ॥ ततश्चोत्तमाधिकारविधियोग्यः पुरुषो भवति कः पुनरु
त्तमाधिकारविधिः यं प्रति कर्मभिः पुरुषो योग्यतामापाद्यते। आत्मा वा अरे द्रष्टव्यः श्रोत
व्यो मंतव्यो निदिध्यासितव्य इति तत्रायं कर्त्ता भोक्ता विज्ञानात्मा लोकप्रसिद्धः सद्दर्शनक्रि

याकर्म्मत्वेन नियम्यते इत्येव च वस्तुनि विचिकित्सोपजायते किं पारमार्थिकं किमौपा
ब्र॰ धिकमिति नानुमानागमगम्ये ततश्च तस्मिन् रममाणस्य निरुपद्रवपरमात्मतत्त्वमुपदिश्यते
श्रोतव्य इति । तस्मिंश्च श्रुतेऽभ्युपगमप्रधानं ज्ञानमुपदिश्यते मंतव्य इति ततो ध्यानं निदिध्यासि
५ तव्य इति सोयमनेन चतुर्विधेन विधिना ध्यानपर्य्यंते वेदार्थे नियुज्यते ॥ तत्र युक्ता चेयं ब्रह्म
जिज्ञासा प्रस्तूयते ॥ ननु च मीमांसायामेव द्वादशलक्षण्यां शब्दव्यापारः कृत्स्नो निरूपितः
तद्व्यतिरिक्तः शब्दव्यापारो नास्ति किमर्थं प्रतिज्ञांतरमुच्यते ॥ सत्यमेवं ॥ तथापि दर्शपौर्णमा
सादिकल्पसूत्रादि प्रयोगशास्त्रवदुत्तमाधिकाराद्धि संस्कारकं शास्त्रमारभ्यत इति । अ
त्रवगमः तदिदं संबंधकथनं न्यायविशेषेण श्रद्दधत्तेन हि धर्माधिकारस्य कृत्स्नस्य पुरुषसं
स्कारद्वारेणोत्तमाधिकारारोपयोगित्वेऽस्ति किंचित्प्रमाणं ॥ स्वाध्यायविधिस्तावत्कर्म्माव
बोधार्थः तदवबोधश्च तदनुष्ठानार्थो दानाद्यर्थश्च ॥ तथा चोक्तं संवर्त्तेन विधानेन सुमति
र्बलतोक्तेमहीयत इति ॥ कर्म्म च विविधं काम्यं नित्यं नैमित्तिकं च ॥ तदपि पुरुषार्थं ॥ काम्यं ता ६
वत्स्वर्गकामः पुत्रकाम इति तावन्मात्राय क्षीणत्वात् ॥ नान्यार्थशक्तं कल्पयितुं युक्तं ॥ आह

तदस्माकं प्रमाणमिति हि न्यायविदः न च योग्यता नाम प्रयोजनांतरं शब्दादवगम्यते यद
पि नित्यं कर्म्म यावज्जीवं जुहुयात् ॥ संध्यामुपासीतेति तत्पुरुषस्यैव प्रत्यवायपरिहारार्थ
मभ्युदयार्थं च । तत्रोक्तं अकुर्वन्विहितं कर्मेति ॥ श्रुतिश्च भवति । त्रयो धर्म्मस्कंधा इत्यु
पक्रम्य सर्व एते पुण्यलोका भवंतीति भावनास्वाभाव्याद्वावश्यं भाव्येन केनापि सामान्येन
भवितव्यमिति पुरुषार्थपर्यवसायी सर्वो विधिः कर्म्मकांडे न तस्य योग्यतापादनं नामाप
रं कार्यं शक्यमुत्प्रेक्षितुम् संतानीदियत्वादस्यार्थस्य दिग्दर्शोहि पेकल्प्यं ति पुण्यापुण्यो
पचयापचयौ च पुरुषार्थौ नोत्तमाधिकारोपयोगिनो विधानामावात् । यं प्रति यो विधिः प्र
वृत्तः कर्तुं पुरुषं वा स तदर्थ एव नान्यार्थः शक्यः कल्पयितुं विस्तरेण तत्तु समन्वयादित्य
त्र निराकरिष्यामः । यदप्युक्तं दर्शनक्रियाव्याप्यतया विज्ञानात्मा नियम्यत इति तदप्यप
व्याख्यानं ॥ तत्रात्मशब्देन परमात्मा विवक्षितः कथं वाक्यशेषात् ॥ आत्मनो वा अ
रे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमिति सर्वविज्ञानप्रतिज्ञानात् न च सह
दुपास्तितो जीवपरः परमात्मपरश्च शक्योग्रहीतं एकार्थनिष्ठत्वादेकस्मिन् प्रयोगे कि

५

चानधिगतार्थगंतृत्वादि धीनां प्रत्यभिज्ञाप्रत्यक्षस्यायं विज्ञानात्मेत्यात्मवादे स्थापितं॥ नच प्रत्य
क्षेव स्तु निर्विचिकित्साऽन्योन्याभ्यस्तवस्तुतानुमानगम्ये सत्तामात्रावगमात्तद्विशेषे विचिकि
त्सास्यात्॥ तस्मादयमर्थः परमात्मदर्शनं कुर्यादिति। न च दर्शने पुरुषस्य साक्षात्स्वातंत्र्यम
स्तीति दर्शनार्थः पुरुषप्रयत्नो विधीयते। स च निर्विषयोऽसंभवतीति श्रवणादिरूपो विधी
यते श्रवणादिनोपायेन प्रयतमानस्यात्मदर्शनमुत्पद्यत इति परप्युक्तं प्रयोगशास्त्रवदारभ्य
त इति तदप्ययेशलं यथा धर्मजिज्ञासा विप्रतिपत्तिनिराकरणार्थमारब्धा तथा ब्रह्मजिज्ञासा
सुतरां चात्र विप्रतिपत्तयो भवंति मोक्षवादिनां तीर्थकाराणां बहुत्वात्॥ न च ब्रह्मविषयो वि
चारो मीमांसायां कचिदधिकरणे वर्तते॥ उपदेशाविचार्यत्वेन तत्सनस्य शास्त्रस्य पर्यवसा
नात्॥ यथा चतत्रोदनालक्षणया विना धर्मविचारो न पर्यवस्यते॥ तथा चतल्लक्षणया
उपदेशइतिशेषः ४ विना ब्रह्मविचारः प्रतिवाक्यं चर्चितमुक्तो नोदनीत्वात्। अज्ञानसंशयविपर्ययाननिवर्त्ते ५
रन्॥ प्रमाणलक्षणं तु साधारणं तच्छ्रुत्यादिप्रमाणं चाविरुद्धमेकत्र स्थितमस्मिन्नाश्रीयते अ
धीतवेदस्य श्रोतुरेकत्वा॥ यदि पुनरेकत्रोक्तं प्रमाणमन्यत्रापयुज्येत। पुनरुक्तमेव स्यात्॥ अ

वाक्यरूपाणामित्यर्थः॥ ३ ब्रह्ममीमांसायां॥ २
औत्पत्तिकसूत्रस्थितं २ उपदेशइतिशेषः ३ तार्त्तीयीकं २

अत एवोपवर्षाचार्येणोक्तं प्रथमपादे आत्मवादं तु शारीरकेवक्ष्याम इति॥ अतः पूर्वोक्त एव
संबंधः ब्रह्मशब्देनेश्वरो गृह्यते न ब्राह्मणजातिर्जीववेदचतुर्मुखानां ग्रहणं ब्रह्मजिज्ञासस्य व
क्ष्यमाणत्वात्। ब्रह्मणो जिज्ञासेति कर्मणि षष्ठी कर्तृकर्मणोः कृतीति विशेषविधानात्। न सं
बंधसामान्ये अत एव चतुर्थी विभक्तिरपि न युज्यते। ब्रह्मणे जिज्ञासेति। ब्रह्मणश्चेप्सिततमत्वा
त्। प्राधान्येन सत्वाच्ये छायाउपसर्जनत्वात् इच्छायामपि हि ज्ञानं प्रधानं ज्ञानमिच्छा ज्ञानार्थमिति
ब्रह्मणः प्राधान्यमुक्तं। किं पुनरिदं ज्ञानं नाम। अत्र केचिन्मीमांसकाः आहुः नित्यानुमेया ज्ञान
क्रिया ततो घटादिविषयं संवेदनमुत्पद्यते तत्तस्याः फलमिति॥ यथा पाकक्रियायाओदन इति त
द्विदमयुक्तमिति ज्ञानं ज्ञानक्रियाकल्पना यां प्रमाणाभावात् येऽमश्वद्गुरादिस्थं करणे स्पर्शक्रि
योत्पत्तिरिष्यते। तेऽप्यत एव प्रतीतिरिष्यतां प्रतीतिः संवेदनमत्त्वन्वइतिचानर्थांतरं तद्भावभा
वित्वात् आलोकेंद्रियसन्निकर्षादिषु हि सत्सु संवेदनमुत्पद्यत इति तदभावे नोत्पद्यते। यदि पुन
रपूर्वं ज्ञानं कल्प्येत तस्याप्यन्यत्तस्याप्यन्यदित्यनवस्यान चज्ञानक्रियानुमाने लिंगमस्तिसंवे
दनमितिचेत्। न। अगृहीतसंबंधत्वात्। यदि लिंगी प्रत्यक्षः स्यात्तदा नेनेदं लिंगं व्याप्तमिति शक्यते

तथा च सपक्षव्यावृत्तेर्हेतुरित्यर्थः॥ १

६ संबंधोग्रहीतुं यथाग्निधूमयोः न चात्मज्ञानक्रियाप्रत्यक्षा यदि च प्रत्यक्षात्तत एव सिद्धत्वा
त्किमनुमानेन ज्ञातसंबंधस्यैकदेशदर्शनाद्विति ह्यनुमानलक्षणं इंद्रियग्राह्यस्य वस्तुनोर्थाप
त्तिसमधिगम्याइति स्थितं न चार्थापत्तिरस्ति इंद्रियार्थसन्निकर्षादनंतरं अनुभवोत्पत्तेः अतो
नुभवएवज्ञानं न तद्व्यतिरिक्तं किंचित्। तस्य च हानादिबुद्धयः। फलं पाकादिवत्प्रपद्यते क्रिया
कारकफलानां प्रत्यक्षत्वात्। किंपुनर्ज्ञानस्य सतत्वं केचिदाहुरात्मप्रमेयमिंद्रियद्वारेभ्यो विनि
र्गताविषये ष्ठ प्रवर्तते अनेकच्छिद्रघटस्थस्य प्रदीपप्रभावदिति तदिदमसम्यग्दर्शनं क्षणिक
मिदं रूपाद्विज्ञानं नित्यमात्मचैतन्यं कथं नित्यानित्ययोरैक्यं यदि च विषय विषयं ज्ञानमात्मचै
तन्यमेव स्यात्ततः सर्वाणि तानि युगपद्भवति स्ये.. निति न कदाचिद्विषयविस्मरणं स्यात्॥ तस्मा
दात्मा वंजोक्तेंद्रियाद्भिन्नो ज्ञानमुत्पद्यमानं निरुध्यमानं चान्यदात्मचैतन्यं चान्यदिति युक्तं ज्ञातुमिच्छा
जिज्ञासेति प्रकृत्यर्थप्रधाने यन्निच्छाधातोः कर्मणि इति धातुवाच्यस्यार्थस्येष्टं ज्ञानं तत्स्मरणं तत् ६
तत्र ब्रह्मप्रसिद्धमप्रसिद्धं वा यदि प्रसिद्धं न जिज्ञास्यं॥ अथाप्रसिद्धं नतरां सोयमनर्थको
ब्रह्मजिज्ञासारंभः तदुच्यते प्रसिद्धं तावद्ब्रह्म आगमप्रमाणगम्यत्वात्। सदेव सोम्येदमग्र

आसीदेकमेवाद्वितीयमिति जगत्कारणोपदेशात्। ब्रह्मशब्दव्युत्पत्तेश्च बृंहते र्धातो र्ब्रह्मयतः
परं बृहदधिकं नास्ति तन्मूलकारणमेव पारिशेष्यात् कार्यप्रपंचे तु ब्रह्मशब्दो गौणः मुख्यप्रवृ
त्त्यसंभवे गौणी भवति यथाग्निर्माणवक इति किंप्रति तर्हि जिज्ञासा तद्विशेषं प्रति विप्रतिपत्तिनिराक
रणार्था केचित् त्रिगुणं प्रधानं जगत्कारणमाहुरपरे। परमाणुं प्रतिजानते ब्रह्म च कारणं त्वना
कार्यात्मना जीवात्मना च त्रिधावस्थितं। तत्र विशेषेण ब्रह्म जिज्ञासा प्रस्तूयते ब्रह्मैवेदं सर्वमिति
ब्रह्मशब्दस्याविशेषात्। तत्र स्वरूपं च प्रमाणं च प्रथमेनाध्यायेन प्रतिपाद्यते द्वितीये न स्मृतिवि
रोधपरिहारः परमतनिराकरणं च तत्र पादे श्रुतीनां च परस्परविरोधपरीहारः। तृतीये न संसारग
तिवर्णनं जीवस्यावस्था क्लेशो ब्रह्मस्वरूप तत्त्वं विद्यानां भेदाभेद विचारो ज्ञानकर्मसमुच्चयश्चेति चतुर्थे
न ज्ञानान्मुक्तिरर्चिरादिमार्गनिरूपणं फलनिरूपणं च क्रियते जन्माद्यस्य यतः जन्म आदिर्यस्य
तदिदं जन्मादि सृष्टिस्थितिप्रलयं तद्गुणसंविज्ञानो बहुव्रीहिः यथा लंबकर्णमानयेति अस्येति जि
गन्निर्दिश्यते यत इति कारणं यस्मादीश्वरात्सर्वज्ञात्सर्वशक्तेः परमकारणादस्य जगतो नाम
रूपाभ्यां व्याकृतस्य विविधविभक्तभोक्तृसंयुक्तस्य नियतदेशकालफलोपभोगाश्रयस्याचिं

स्य रचनस्यास्य सृष्टिस्थितिप्रलयाः प्रवर्त्तंते तद्ब्रह्मेति प्रतिपत्तव्यं उपादानं कारणं चेह लक्षितं वैशे
षिकाः पुनरनुमानेन केवलं निमित्तकारणमीश्वरं साधयंति बुद्धिमत्कारणपूर्वकं जगत्सासा
वयवत्वात्कार्यत्वाद्वा घटादिवदिति तदयुक्तं संबंधग्रहणाभावात् ॥ न हि सावयवत्वेनानेन जग
ताईश्वरस्य संबंधोनुभूतपूर्वः तस्यातींद्रियत्वात् बुद्धिमत्कारणपूर्वकमिति च सिद्धसाध
नं कर्म्मनिमित्तत्वात् संसारस्य कर्म्मणश्च बुद्धिमत्पूर्वकत्वात् पुत्रादिजननमपि यत्नमात्रेण तत्
सिद्धं तदपि बुद्धिमता क्रियते यथा च दृष्टांते कुंभकारादिः असर्वज्ञः शरीरेंद्रियवांश्च कर्त्ता तथा
दार्ष्टांतिकेपि शरीरेंद्रियमत्त्वं असर्वज्ञत्वं च प्रसज्यते ततश्चानीश्वरत्वं न च वाहिनोयोगिमतो धर्म्मः
स एव व्यवहितो न शक्ति वा धूमक्ष इति नियंता कश्चिदस्ति अत्यंतातींद्रिये वस्तुनि साध्यमाने यावंतो ध
र्म्मा दृष्टांते दृश्यंते अन्वयव्यतिरेकपरिशुद्धाः संभवंति ते सर्वे प्रसज्यमानाः केन वार्यंते । ननु चैव
मनुमानोच्छेदः प्रसज्यते । अनित्यः शब्दः कृतकत्वाद् घटादिवदिति दृष्टांतधर्माः सर्वे शब्दे प्रसज्येर
न् अत्रोच्यते । नन्वत्र तावत्सम्यगनुमानं वर्त्तते प्रज्ञापि प्रमाणं तद्गोचरे किं लिंगिनि तेन वारिता धर्म्मा ७
निवर्त्तंते पाकत्वादयः अयं पुनः प्रत्यक्षाद्यविरुद्धो नित्यो ऽनित्यो वेति प्रतिज्ञायते । स तत्र

हेतुना साधयितुं शक्यते ॥ अत्र पुनः सावयवत्वादित्यनेन हेतुना यावंतो धर्म्माः वदास्ते सर्वे प्र
सज्यंत एव वा युक्तैव तर्कव्यवस्थितिर्वा धूमक्षमपि दूषणं ग्रहीतव्यं ॥ एवं सावयवत्वादिति चानै
कांतिको हेतुः न केवलमयं विरुद्धश्च कथं बीजादंकुरो जायते । न तत्र बुद्धिमत्कारणपूर्वकत्वं
प्रत्यनुमानं च क्षित्यादीनि वायुपर्यंतानि कार्याणि न भवंति महाभूतशब्दवाच्यत्वादाकाशवत् ॥
अतः सावयवत्वात्कार्यत्वादित्यादयो हेत्वाभासा इति स्थितं ॥ अत एवेदं सूत्रं सदनुमा
नप्रदर्शनार्थं न भवति किंतु वेदवाक्यप्रदर्शनार्थं किं पुनस्तत् यतो वा इमानि भूतानि जायंते । येन
जातानि जीवंति यत्प्रयंत्यभिसंविशंतीति ॥ जन्मादिकारणं ब्रह्मेति कथमवगम्यते । न हि पूर्वसू
त्रे विशिष्योक्तं येन प्रमाणेन विशेषावधारणं स्यादत आह ॥ शास्त्रयोनित्वात् ॥ शास्त्रं योनिः प्र
माणं यस्य तदिदं शास्त्रयोनि ब्रह्म तस्य भावः शास्त्रयोनित्वं शास्त्रप्रमाणकत्वादिति याव
त् ॥ अत्र केचिदाहुः प्रपंचप्रविलापनद्वारेणात्मनः कार्यतान्नियोगविषयत्वमतश्च शास्त्रयो
नित्वं च स्वतउपाधिनिबंधनाश्च कर्त्तव्यतायाः प्रामाण्ये कश्चिद्विशेष इति तदिदं निःप्र
माणकमभिहितं नित्यश्चात्मा कथं कार्यत्वं प्रतिपद्यते कार्यश्चेद् घटवदनित्यः स्यात्कार्यश्च

भ॰ट॰ निष्पन्नत्वेतिपरस्परव्याहतंवचनंनचान्यस्मिन्हतेऽन्यःहतोभवतिनहिघटेहतेपटःहतं
८ भवति॥ यदिश्रुतिर्ब्रूयादात्मानंकुर्यादितितदाऽशक्योपदेशादप्रमाणंस्यात् यथाग्निनासिंचेदु
दकेनादीपयेदितिवचनमप्रमाणं अथैतद्दूषणभयात्प्रपंचप्रविलापनंकुर्यात् इतिवाक्यार्थं
कल्पयेत् नतदप्यशक्यत्वात्प्रविलापनस्याश्रुतत्वाच्च नहिपुरुषमात्रेणपृथिव्यादीनिमहाभूता
निप्रविलापयितुंशक्यंते समाहितेमनसिसुषुप्तेवासर्वंतिरोहितंसुप्तिर्तस्यतदैवसर्वपुरतोऽव
तिष्ठतेनचप्रपंचप्रविलापनेकश्चिदुपायोस्तिनहिप्रपंचेनैवप्रपंचप्रविलायनंशक्यंकर्तुं अ
नवस्थाप्रसंगात्॥ सोप्यन्येनतस्यतस्याप्यन्येनतस्याप्यन्येनेति॥ साधारणेनचाप्रपंचःप्रवि
लाप्यते विशिष्टोनास्ति॥ आत्मापवंधकारणस्याविद्याकामकर्मलक्षणस्यविनाशनंप्रपंचप्रवि
लापनंयदिमन्यसे तत्रनास्तिविसंवादइतिसाधारणेनचप्रविलापितेसर्वमुक्तिप्रसंगः॥ श्रु
केनवासमूलंनाविनाशितंजगत् इदंयदद्यदृश्येत॰ प्रपंचप्रविलयविषयश्चनियोगोनियोज्यपुरु
षादिसापेक्षः तत्रयदिकर्त्राविलापितास्यात्तदनेर्घानीनियोगःक्रियेत नियोगेऽपिकार्यरूपंचे ८
तत्क्रियावतःप्रपंचस्यविधानंप्रपंचरूपेणनियोगेनप्रपंचप्रविलायनंसंभवतितुल्यत्वात् नच

नियोगःकारकत्वेनोपदर्श्यते कार्यत्वेनपरंनचसाध्यत्वेनसाधनांतरंप्रपंचरूपम्॥ अभ्युपगंतव्य
मितिकुतःप्रपंचप्रविलायनसंभवः किंचप्रतीतिवेलायामेवात्रप्रविलयोऽभ्युपगम्यतेऽन्यत्रउ
तराग्निहोत्रादौप्रतीतिकालोऽन्योऽनुष्ठानकालोऽन्यः यदिचप्रतीतिमात्रेणनियोगसिद्धिर्निष्यतेत
थासर्वत्रैवानुष्ठानलोपःप्रसज्येत नहिप्रविलयःकर्तव्यइतिज्ञानमात्रात्प्रविलयोजायते नचध्या
नंप्रविलयहेतुःध्यातृध्येयादिप्रपंचात्मसंनिधानात् सुषुप्तौतस्यपृथिव्यादीनांतथाचस्थानात्॥ किंच
प्रविलापनंव्यापारः किंवाअभावइतियदिव्यापारःप्रपंचस्तद्रूपएव॥ अथाभावस्तदालब्धवि
योनियोगोनोपपद्यते तस्याऽवस्तुत्वप्रतिज्ञानात्॥ नहिशशविषाणविषयोगःसंभवति॥ अतए
वकर्मकांडेपिनकलंजंभक्षयेदित्येवमादिषुनियोगानुपपत्तिरित्यतप्रतिप्रसंगेन॥ अथात्म
ज्ञानविषयोनियोगःपरिकल्पितआत्मज्ञानंकुर्यादितितदप्ययुक्तंज्ञानस्याऽपुरुषतंत्रत्वात्॥
क्रियाहिकर्तुमन्यथावाकर्तुंशक्यते अश्वेनगच्छतिपद्भ्यांवापुरुषेच्छानुरोधित्वात्॥ नज्ञानंपुरु
षेच्छामनुरुध्यतेप्रमाणप्रमेयवशवर्तित्वात् तदुपायस्तुशक्यतेविधातुमनुष्ठातुंचश्रवणा
दिः नतुसाक्षात्स्वेच्छयाज्ञानंपुरुषोनिष्पादयितुंशक्नोति॥ ननुचस्वाध्यायविधिनाज्ञानंवि

धीयते॰ न॰ तत्राध्ययनं विधीयते अर्थज्ञानं तु फलं तच्च स्वप्रमाणं दग्निहोत्रादिवाक्यात्तत्त्वमसे
ये स्वयं जायते ॥ न पुरुषेच्छयेति॰ इदं च भवान् पृष्टो व्याचष्टां किमात्मज्ञानमुत्पन्नमनुत्पन्नं वे
ति यद्युत्पन्नं विषयासिद्धेर्न नियोगसिद्धिर्विषयसिध्या हि नियोगसिद्धिरिष्यते॰ यथा स्व
र्गकामो यजेतेति यागसिध्या नियोगसिद्धिस्तद्वदत्रापि स्यात् ॥ अथ श्रवणादिनोपायेनोत्पन्नं
ज्ञानं तदा तेनैव पुरुषार्थसिद्धेः किमंतर्गडुना नियोगेन कल्पितेनेति तथा च श्रुतिः ॥ तमेव वि
दित्वाति मृत्युमेति नान्यः पंथा विद्यतेऽयनायेति ॥ ज्ञाननियोगयोश्च यदि संबंधो नेष्यते अ
नर्थितो वाक्यार्थः स्यात् ॥ अथ संबंधोस्ति तत्रापि गुणप्रधानयोः परस्परसंबंध इत्यवश्यमेक
स्य गुणत्वमावोऽन्यस्य प्राधान्यं यदि नियोगो ज्ञानार्थः स्यात् नियोगस्य वाक्यार्थता सर्वत्र यत्प्राधा
न्यं प्रतिज्ञातं तद्धीयेत ॥ अथ ज्ञानेन नियोगसिद्ध्यर्थं ततो मुक्त्यर्थत्वं न स्यात् ॥ न चोभयार्थत्वे प्रमा
णमस्ति न च नियोगो मुक्त्यर्थः अश्रुतत्वात् तमेव विदित्वेति ज्ञानस्यैव साक्षात्तादृशात् ॥ न चाज्ञानश
ब्देन नियोगो विधीयत इति ॥ अत्र नियोगपरिकल्पनं कल्पनमेवेत्युपरम्यते ॥ ननु च शास्त्रयो १९
नित्वं ब्रह्मणो नोपपद्यते॰ कस्मात् कार्यपरत्वाद्वेदस्य ॥ तथा हि चोदनालक्षणोऽर्थो धर्मः तस्य

ज्ञानमुपदेशः तद्भूतानां क्रियार्थेन समाम्नायः ॥ आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामि
ति कार्यपरत्वेनैव तत्र तत्रानुक्रमणात् ॥ न च सिद्धरूपे ब्रह्मणि विधिः संभवति ॥ साध्यार्थविष
यो हि सः स्वर्गकामो यजेतेत्याख्यातशब्देभ्यः क्रिया प्रतीयते॰ सिद्धरूपे च वस्तुनि वाक्यं प्रयुज्यमा
नं प्रमाणांतरसापेक्षं त्वन्यथा पचति गच्छतीति प्रमाणांतरेणोपलभ्य प्रयुक्तेन च लोके स्वरूपपरः प्र
योगो दृश्यते ॥ ननु नायं सर्पो रज्जुरेवेति दृश्यते नैतदेवं तत्रापि विधिरध्याह्रियते मा भैषीरिति ॥ वृद्ध
व्यवहारे यत्परः प्रयोगो दृश्यते तत्परो वेदो भवितुमर्हति तत्र पूर्वं कार्यत्वात् तद्व्यवहारस्य किंच कार्य्य
परेष्वेव वाक्येषु प्रयुज्यमानेषु पदानां वाचकशक्तिरवधार्य्यते गामानयाश्वमानयेति तथा शुक्लां गां
रुसामित्येवं जातिगुणक्रियावत्त्वान्बबुध्य प्रयोगदर्शनात्संबंधव्युत्पत्तिर्भवति॰ न च स्वरूपे व्युत्प
त्तिर्दृश्यते ॥ अतो व्युत्पत्तिभ्रन्त्या स्वरूपावगतिः ॥ अतो वेदांतवाक्यानां कर्म्मापेक्षितकर्तृस्वरूपसमर्प
णेनार्थवत्त्वं यथार्थत्वं वा ॥ तथा चोक्तं सर्वे वेदांता इति केचिदेवं मीमांसका मन्यते ॥ अपरे पुनर्मीमांस
कदर्शनानुसारिणो वेदांतमेव मुक्त्यर्थयति विधिविषयतया शास्त्रयोनित्वं न स्वरूपपरतया तथा च
विधिः श्रोतव्यो मंतव्यः सोऽन्वेष्टव्यः स विजिज्ञासितव्य इति को सावात्मेत्यपेक्षायां सर्वेषां वेदांतवा
क्यानां स्वरूपप्रतिपादनापर्यांस सदेव सोम्येदमग्र आसीदित्येवमादीनां तादर्थ्येनोपयोग इति ह

भट. त्वो वेदांतः कार्यपर इति ॥ भवतु तावद्वेदांतगतानां वाक्यानामेवमद्वैतात्मप्रतिपत्तिविधिपर
त्वेन समन्वयः कर्मकांडस्य तु कथं समन्वय इति न चान्यतरस्य परित्यागः प्रामाण्याविशेषा
१० त्। अत्रोच्यते। भेदाभेदविषययोः कर्म्मज्ञानकांडयोः परस्परविरोधादन्यतरानुरोधेनान्यत
रव्याख्येयं। तत्र निःश्रेयसफलप्रतिपादनपरस्य वेदांतस्य न कर्म्मविधिशेषत्वेन व्याख्यानं यु
क्तं कर्म्मविधीनां तु तादर्थ्यं शक्यमवगंतुं कथं आन्वयिकं प्रासंगिकं च द्विविधं कार्य्यं दृश्यते। स्वर्ग
कामो याग काम इत्यान्वयिकं कार्य्यं ॥ प्रासंगिकं पुनः स्वाभाविकीनां बाह्याभ्यंतरप्रवृत्तीनामुप
रमः कुम्भस्थया नियोग निरस्य च रागादित्वयो दस्तानुश्रविकत्वो गेधिति तत्र यद्यपि कर्म्मवि
धिभिरान्वयिकं कार्य्यमाश्रितं तथाप्युत्तमाधिकारविधिना प्रासंगिकं कार्य्यमपेक्षितमिति तस्यैव
प्राधान्येन विवक्षितं नैसर्गिकाभिनिवेशसिद्धं च भेदमाश्रित्य कर्म्मविधीनां प्रवृत्तेरविरोधः य
था श्येनविधिः शास्त्रांतरनिषिद्धहिंसाविषये न हिंस्यात्सर्वभूतानीति मिथ्यादर्शिनं प्रतिबोध
यति कल्पावस्थितं पुरुषमाश्रित्य प्रवर्तते ॥ दृश्यते च लोके मिथ्याविषय उपदेशस्तत्त्वज्ञानोपाय
रः यथा किल कश्चिद्राजपुत्रः तस्करैरानीय निषादराजाय निवेदितस्तेन चासौ पुत्रत्वेन परि १०
गृहीतो म्लेच्छाचारैरभिरतिरेवास्ते तं राजमंत्री तत्रागत्य म्लेच्छजातेरनुगुणमेवाचारं कंचिदनु व

र्थ पश्चाद्राजपुत्रोऽसि त्वं न म्लेच्छपुत्र इति ग्राहिते समस्तम्लेच्छाचारं हित्वा स्वरूपमेव प्रतिपद्यत
इति तस्माद्वेदांतानां प्रतिपत्तिनियोगपरत्वं न स्वरूपपरत्वमिति प्राप्ते ब्रूमः ॥ तत्तु समन्वयान्
यात् ॥ तुशब्दः पूर्वपक्षं व्यावर्तयति। ब्रह्मस्वरूपं शास्त्रमवबोधयति। न केवलं कार्य्यमेव कु
तः समन्वयात् सम्यगन्वितानि हि ब्रह्मस्वरूपप्रतिपादनपरत्वेन सर्वप्रकरणगतानि सदेव सोम्ये
दमग्र आसीदात्मा वा इदमेक एवाग्र आसीत् तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्येवमादी
नि वाक्यानि ॥ न च तेषां ब्रह्मपराणामर्थांतरकल्पना युक्ता। श्रुतहान्यश्रुतकल्पनाप्रसंगात्। न च
कार्य्य एव प्रामाण्यं प्रतिपत्तेरुक्तं स्वरूपावबोधेऽपि प्रामाण्यस्याविशिष्टत्वात्। अपौरुषेयत्वं हि
प्रामाण्ये कारणं तच्चाविशिष्टं ॥ अथोच्यते अग्निहोत्रादिवाक्येषु कार्य्यावगतिः प्रामाण्यका
रणमिति तद्युक्तं चेत् एवं दन वाक्येऽपि प्रसंगात् ॥ अथापौरुषेयत्वे सत्यनपेक्षत्वात्प्रमाणता। त
दनपेक्षत्वं वेदांतेऽपि तुल्यं लोके वेदे च पदानां स्वार्थप्रत्यायने अनपेक्षत्वमविशिष्टं ॥ वाक्यानां
तु लौकिकानां स्वरूपे कार्ये वा प्रमाणांतरापेक्षया प्रामाण्यं तदभावे अप्रामाण्यं ॥ यथा खलु पुष्पं
तिष्ठति खपुष्पं यग्रेत्यादीनां ॥ वैदिकानामपौरुषेयत्वादनपेक्षत्वे प्रमाणांतरानधिगतत्वाश्रम
लकारणस्य नापरिनिष्ठितत्वं न वा कार्यत्वं प्रामाण्ये कारणं किं त्वनधिगतार्थगंतृत्वं ॥ यथा हि प्र

न्य॰ ११ तत्तत्प्रमाणं सिद्धरूपावबोधकं तद्वत्सदेव वाक्यमपि भविष्यति ॥ न च कार्यप्रतिज्ञायां तत्प्रमा
णं तत्र वर्तत इति दृष्टांतोऽस्ति यदुक्तं स्वरूपपरः प्रयोगो नास्तीति तदपर्यालोचितवचनं कार्य्यवज्ञ
स्वरूपे प्रयोगो दृश्यते नायं सर्पोऽयं रज्जुरेवेति नात्र विधिपदाध्याहारस्यावसरः रज्जुतत्वावबोधे
च्छायं निवर्त्तकं तेन दृष्यादावे विधिशतेनापि भयं न निवर्तते संदर्शनाच्चापि वाक्यस्य नाध्याहार
संभवः ॥ यद्यपि वादिना वाक्यं प्रयुज्यते प्रतिवादिनं प्रति नित्यः शब्दः प्रत्यभिज्ञानात्सामान्य
वदिति तदपि वस्तुतत्वावबोधार्थं न तत्र विधिर्विद्यते हेतुवशात्तत्रार्थप्रतिपत्तिर्न विधिवलात् ॥
न्यायसहस्रमतियादृकं च नाप्यं न विधिपरं तथा कृतो देवदत्त इति दृष्टे तीर्थयात्रां गत इत्यु
त्तरं ॥ एवं तत्र तत्र द्रष्टव्यं । ननु स्वरूपावबोधनेऽस्त्यपि किं कार्यमित्याकांक्षा जायते ॥ सत्यं कार्य
वाक्येऽप्यपेक्षा प्राया दिशि दृग ॥ यो हिमाणवकेत्युक्ते किमर्थमिति पृच्छति भो त्तुमित्युत्तरं दीयते ॥
स्वरूपपरं कार्यपरं वा वाक्यं किंचित्प्रयोजनमुद्दिश्य प्रयुज्यते ॥ न प्रयोजनं शब्द्यमित्यतो वात्र नि
यमः ॥ प्रयोजनं च नियोग एवेति नास्ति नियमः ॥ यथा कर्म्मकांडेऽस्य स्वर्गादिप्राप्तिः फलं मन्त्रापवर्गप्रा ११
प्तिः फलमिति स्तु पश्यास्य तु भवान् ॥ यच्चोक्तं कार्यपदे सुसंबंधग्रहणं तत्रैव तेषां शक्तिर्नान्यत्रेति

तत्रोच्यते ॥ यद्येवं कार्ये व्युत्पत्तिर्होयते तदा तेषां शक्तिः स्यादुर्ज्ञानप्रत्यक्षानुमानपरिच्छिन्नेऽर्थे लौकिके व्य
वहारे शक्तिदर्शनात् ॥ किंच संबंधग्रहणकाले यद्यद्विशेषणं दृष्टं देशकालप्रयोक्त्रादि तत्सर्वं श
क्तेर्नियामकं स्यात् ॥ अथ यद्दृष्टं संबंधग्रहणोपायं तत्तावदीर्यदिष्यते ॥ कार्यं च तद्दृष्टमेवेति तत्र शक्ते
र्नियामकमिति । इतश्च कार्यमनियामकं नित्यत्वात्संबंधस्य यस्तु नित्योऽर्थः यावकादिकारकं सोऽनुरु
ध्यते ॥ किंच उपेयवेदनं यावदुपायानीप्रतीक्षणं । उपेये तु प्रविदिते नोपायः पुनरपेक्ष्यते ॥ यथा रत्न
परीक्षाशास्त्रं रत्नस्वरूपसंवेदनार्थं स्वरूपे विदिते पश्चान्नोपायः पुनरपेक्ष्यते ॥ किंचान्वयव्य
तिरेकाभ्यां पदशक्तेर्विनिश्चयः ॥ प्रतिपदं च शक्त्यवगमो न पदसमूहस्य ॥ ननु च पदांतरापेक्षं तत्तत्प्र
युज्यते ॥ ततश्च वाक्यस्यैव वाचकशक्तिर्नैकस्य पदस्य ॥ अत्रोच्यते गुरवमस्तीति किं नाम न प्रयुज्यते
यदि पदांतरापेक्षा पदस्य वाचकशक्तिः स्यात् ॥ न लोम गामानयेत्यत्र प्रयुक्तस्य गोपदस्य गां पश्येत्य
त्र वाचकशक्तिर्न स्यात् । आनयेति प्रयोगाभावात् ॥ ततश्च प्रतिवाक्यं संबंधग्रहणं चैव स्यात् तथं व्य
वहारः ॥ कश्चिन्निषिध्येत ॥ किंचाश्वमानयेत्यानपतिसन्निधाना दृश्यपदस्य गोत्वं बाध्यं स्या
त्स्वतोऽपर्याप्तत्वात् ॥ अथाश्वशब्दस्याश्वत्वं वाच्यमिति श्वपुरुषस्पते गोशब्दस्य गोत्वं सि

न॰
१२ र्थस्तु हि प्रतिपदमर्थभेदेनयत्तं तरसत्रि्विधिर्निमित्तं ॥ शक्तिमतामेवपदानां सह प्रयोगः प्रयो
जनापेक्षः । करकाणामिवकोसलादीनां न पदसामान्यगता वाचकशक्तिः सर्वत्र सर्वार्थप्रतीतिप्रसं
गात् ॥ अतः पदविशेषगता वाचकशक्तिः सा चप्रतिपदमन्वयव्यतिरेकसामर्थ्यादितिश्रूतो भि
धीयमानानां पदार्थानामन्वयोन्वितामिधानं शक्तितो वस्थितं । न च सर्वेषां पदानां कार्यवाच्य
पर्यायत्वे न सहप्रयोगानुपपत्तेः तरुपादपशब्दवत् ॥ अन्वयव्यतिरेकाभ्यां लिङादिप्रत्ययवाच्य
त्वं कार्यत्वं कार्यस्यातो यत्र लिङादयः प्रयुज्यंते तत्र कार्यपरः पदसमन्वयः अन्यत्र तु प्रमाणांतरा
नधिगतस्वरूपप्रतिपादनं न तत्र तत्पदं रइति इष्यं न सर्वत्रैकरूपापादनेर वेदनीयं मनः यदि
च दुर्ग्रहत्वले न सर्वत्र कार्यपरत्वं वर्ण्यते ॥ सर्वत्र सर्वशक्तीश्वरस्यतत्वं न सिध्यति । कुतः । विध्य
र्थवादमंत्रात्मा त्रिधा वेदो व्यवस्थितः ॥ स चेदिदं कार्यपरो न स्वरूपे प्रमाणता । किं केन कपभिति
अंशायेहो विधिः । अंशव्यतिरिक्तं च नियोगे नाक्षिपति शेषस्य वा कजातस्य सोरोदित्यादेस्तु १२
त्यर्थेन समन्वयः मंत्राणां च प्रयोगस्मारकत्वेन अतो निरतिशयानंदमवश्यं स्वरूपपरत्वमेवे
ए व्यतीश्वरस्य सिध्यतीति षष्ठप्रपाठको जगत्कारणप्रतिपादनपरत्वेनानेकैर्दृष्टांतैः पर्यव

तत्वमसीति
वाक्यस्यनत
छद्धेतोत्पर्य

सितः ॥ तदास्य विजिज्ञासुपसंहारात् ॥ वाक्यतात्पर्यत्तिः कल्पतंताती दियं पदिः ॥ नास्यर्थ्य
किमभिप्रेतं तच्छब्देन किमुच्यते । नियोगस्य वा कार्यत्वे नाभ्युपगमात्समस्तस्यपदजातस्य
तत्परत्वं प्रसज्यते ॥ प्रपंचविषयश्च नियोगो निष्प्रपंचं ब्रह्म तयोः परस्परविरोधात् संबंधः
अंशत्रयव्यतिरिक्तत्वाच्च ब्रह्मतत्वं नियोगसिद्धो नापेक्ष्यते नुष्ठातृभिः न च योगस्य वाक्यार्थत्वे मीमां
सायां भाष्यांतरं शरीरके वा स्वत्र भाष्यांतरं स्त्त्वकमस्ति ॥ भावनायास्तु पुरुषप्रयत्नरूपायावाचकं भाष्या
ह्यंसूत्रा ह्यंरं च विद्यते ॥ आष्यांतरं तावत् । ये प्राहुः किमपि भावयेदिति तेस्वर्गकामपदसंबंधात्स्व
र्गं भावयेदिति ब्रूयुरिति भावार्थाधिकरणे स्पष्टं सूत्रान्तरमपिकृतप्रयत्नापेक्षत्वादिति ॥ शरीरेंद्रिय
मनसामात्माधिष्ठितानां चेष्टाविशेषः प्रयत्नः स च धात्वर्थसाधारणः धात्वर्थानुक्तः परस्परं भिद्यंते
प्रयत्नस्तु न भिद्यते । नदीसंतरणकाष्ठच्छेदनगमनादिषु स्पष्टमसौलक्ष्यते । स एव चसा धत्वात्तावकार्यो
तो रुवेदयोः नियोगस्तु तदस्यो रागादिवत्प्रवृत्तौ निमित्तमात्रेन वाक्यार्थ इति स्थितं यदुक्तं वेदांतानां
कर्तृप्रतिपादनपरत्वं वात्मजपार्थत्वं वेत्ति तत् देवं सति निरस्तं नहि जगत्कारणं ब्रह्म कर्म्मसु कर्तृत्वेन नियु
ज्यते ॥ जीवस्तु नियुज्यते तस्य चात्मत्वं प्रमाणेभ्यो वा सिद्धमिति न वेदांतवाक्यापेक्षा । प्रक
रणाधनावाल्पानं कर्म्मशेषत्वं वेदांतानां यदुक्तं कर्म्मविधीनां कार्यदयमात्रविकंम्रासंगिकं चेति

नर·
१३
तदुत्पेक्षामात्रं आत्यन्तिकमेवैकं कार्यं श्रुतत्वात् ॥ अंशापेक्षो हि विधिः फलांशं करणांशमितिकर्त्तव्यतां
शं चापेक्ष्यते । यदि फलांशे च करणांशे विधिः परिसमाप्तः तदर्थं कार्यमिति तदा फलं कल्प्यते न च नैसर्गिकप्रपंचोपर
मः कर्मानुष्ठानमात्रेण भवति यद्वा ज्योतिष्टोमादिषु प्रवर्त्तते तत्रापि यजमानत्विग्ग्रहचमसादिप्रपं
चोऽस्त्येव चक्षुरादिभिश्च रूपादिदर्शनस्य च विलयश्चास्योपरमः कस्यचिद्दृष्टं वदति न प्रपंचोपरमः
प्रयोजनं दृश्यते न च कर्मणि प्रवृत्तानां त्रिवर्गपराणामात्मज्ञानोत्पत्तेः प्रागवस्थायां वर्त्तमानानां दृष्टादृष्ट
विषयोपयोगश्च निवर्त्तते । कर्मिणां तु सुतरां रागो विवर्द्धते ॥ तथा चोक्तं भगवता भोगैश्वर्यप्रसक्ता
नामिति । श्रुतिरपि यत्कर्मिणो न प्रवेदयंति रागादिति तस्मात् प्रासंगिकं । फलमेवास्त्विदं ॥ यद्य
प्यस्ति तथाप्यविवक्षितं ॥ यश्चार्थादर्थो न स चोदनार्थ इति न्यायात् ॥ तथा च स्तुतशस्त्राधिकरणे स्तो
त्रशस्त्रयोः श्रुतमपूर्वमेव प्रयोजनं देवतास्मरणं प्रासंगिकमिति स्थितं ॥ ऐंद्र्या गार्हपत्यमुपतिष्ठत इ
ति चाग्निहोत्रोपस्थानं गम्यमानमिति नैरूपस्थानं ॥ यथा च प्रकृतिर्विकृतिं नापेक्षते परिपूर्णत्वात्
विकृतिश्च पुनः प्रकृतिमपेक्ष्यते ऽपरिपूर्णत्वात् ॥ एवं पूर्वो वेदभागः परेण नापेक्ष्यते स पुनः पूर्वम १३
पेक्षते वेदांतवाक्यैरेव ज्ञानसहकारितया नित्यकर्मापदेशात्तमेवैतं वेदानुवचनेनेति ततश्चात्मज्ञा
नाधिकृतस्य कर्मभिर्विविदिषापवर्गानुपपत्तेः ॥ ज्ञानेन सह कर्म्म समुच्चीयते इति यत् । पुनः केवलकर्मभिः

क्रियमाणं कर्म्म पुरुषप्रयोक्तृतापादनद्वारेण तमाधिकारविधिशेषत्वं प्रतिपद्यते तदुत्पत्तिमात्रेण
कल्पितं । न च लौकिकेन दृष्टं तेन वैदिको वेदो निरूपयितुं शक्यते । अनुमानादिनामविषयत्वात् ॥
यदप्युक्तं भेदाभेदयोर्विरोध इति तदभिधीयते । अनिरूपितप्रमेयत्वस्येदं चोद्यं । एकस्यैकत्व
मस्तीति प्रमाणादवगम्यते ॥ नानात्वं तस्य तद्रूपं कस्माद्धेतोर्निषिध्यते ॥ यस्मात्प्रमाणैः परिछिन्नमविरु
द्धं हि तत्तथा ॥ वस्तुजातं गवाश्वादि भिन्नाभिन्नं प्रतीतितः ॥ न ह्यभिन्नं भिन्नमेव वा क्वचिद्दर्शयितुं शक्य
ते ॥ सत्ताज्ञेयत्वद्रव्यत्वादिसामान्यात्मना सर्वमभिन्नं । व्यक्त्यात्मना तु परस्परवैलक्षण्याद्भिन्नं ॥ तथा हि
प्रतीयते चेदुभयं विरोधः कोयमुच्यते । विरोधे चाविरोधे च प्रमाणं कारणं मतं ॥ एकरूपं प्रतीतत्वाद्द्वि
रूपं तत्तथेष्यतां ॥ एकरूपं भवेदेकमिति नेश्वरभाषितं ॥ ननु शीतोष्णयोर्यथा परस्परं विरोधस्तथा
भेदाभेदयोः किमिति मुच्यते नास्ति विरोध इति ॥ अत्रोच्यते ॥ भवतः प्रज्ञापराधोयं न वस्तु विरोधः क
थं सहानवस्थानं छायातपवद्भिन्नदेशवर्त्तित्वं वा शीतोष्णवद्विरोधो नाम एतदुभयमिह कार्यका
रणयोर्ब्रह्मप्रपंचयोर्नास्ति न तदुत्पत्तेस्तत्रैवावस्थितेस्तत्रैव प्रलयात् । विरोधे हि त्रयमेतन्नो
पपद्यते ॥ न हि लशानुनांकुरोत्पत्त्यादिलक्षणः संबंधो दृश्यते ॥ कारणे न हि मृत्सुवर्णादिनाका
र्यं सर्वदैवानुस्यूतं दृश्यते तत्राहिद्विणी निमील्य परस्परासंगतिलक्षणो विरोधो वैयात्याद्दत्तो

व्यो भवेत्। प्रापञ्चिकश्रोत्रियश्रोत्रप्रतारणपर्यवसायितोस्य यो भिन्नाधारवर्त्तिनो नैकदाचिदुत्पाद्योस्या
म.ठ. दकलक्षणः संबंधो नाधाराधेयलक्षण इति युक्तस्तयोः परस्परविरोधः तस्मात्तशीतोस्रवदिति
१४ मयुक्तं दृष्टांताभिधानं॥ अत्र प्रागल्भात्कश्चिदाह। यथा संशयज्ञानं स्थाणौ वा पुरुषो वेति द्विप्रमाणं
तथा भेदाभेदज्ञानमिति तदसत्॥ परस्परोपमर्देनैकदाचित्सहस्थितिः॥ प्रमेयानिश्चयाच्चैव संश
यस्याप्रमाणता॥ अत्र पुनः कारणं द्रव्यं सिद्धं मृत्सुवर्णादिलक्षणं॥ ततस्तत्कार्यं पश्चाज्जायमानं तदाश्रि
तमेव जायते॥ कारणसमानार्थतया हि कार्यबुद्धिः॥ न च कारणस्वरूपोपमर्देन देशतः कालतो वा पृथ
क् तत्कार्यं दृश्यते॥ तस्माद्यत्किंचिदेतत्॥ यत्प्रपंचमिथ्यात्वप्रतिज्ञानं। न च पुरुषापेक्षया मिथ्यात्वं
सत्यत्वं वा प्रपंचस्य कल्पयितुं शक्यं मुमुक्षुं प्रति मिथ्या इतरान्प्रति सत्यमिति न हि रूपमंधान्प्र
ति असत्यमितरान्प्रति सत्यमिति शक्यं वक्तुं॥ न हि पुरुषस्य रूपानुबोधिनो भावाभावे नेत्रस्यापेक्षया
सत्यत्वमसत्यत्वं वा भजेरन्। तथा च नरस्य घटादिज्ञानवस्तुनः सदसत्यता॥ न हि रूपमंधानां स
त्यं नैव संभवेत्॥ यथा सहस्ररश्मिस्तत्त्वं तं निर्दृष्टं च तत्प्रतिकिंच। मुमुक्षुं प्रत्यसत्यवस्तुत्वमि १४
तरान्प्रति वस्तुत्वमिति युगपत्तस्य मिथ्यात्वप्रसंगः किंच प्रपंचास्तित्वमज्ञस्य तस्येव ज्ञानि
नः पुनः॥ स एव किल नास्तीति कथं न्याय्यं भवेत्॥ न हि द्विचंद्रः प्राग्भासीत्पश्चान्नास्तीति युज्य

ते। द्विचंद्रज्ञानवदिति युक्तमभ्युपगंतमं बालाद्युल्पत्वं प्रत्यक्षादेस्तत्पेक्ष्यते। मिथ्यात्वं किल बा
धेन प्रत्यक्षादिज्ञानस्य प्रतिपाद्यत इत्यभ्युपगमात्। सर्वदैव मिथ्यात्वं द्विचंद्रज्ञानवदिति युक्तमभ्यु
पगंतव्यं वा लाईजरतीयन्यायाश्रयणं। यथागमेनापि मिथ्यात्वं न प्रतिपद्यते तथा तदनन्यत्व
मित्यत्र वचादृपमः न च तिमिरवत्प्रपंचमिथ्यात्वे कारणदोषो गृह्यते॥ अतो भिन्नाभिन्नरूपं प्रलेति
स्थितं॥ संग्रहश्लोकः॥ कार्यरूपेण नानात्वमभेदः कारणात्मना॥ हेमात्मना यथाभेदः कुंडलाद्या
त्मना भिदेति। वेदांते निपुणंमन्यः कश्चिदाह॥ अत्राप्यविद्याकारणदोष इति। यद्येवमविद्यावतां यदु
त्पन्नं ज्ञानं तच्चेन्मिथ्येत्यभ्युपगम्यते॥ ब्रह्मज्ञानमपि मिथ्या स्यादविशेषात्॥ अविद्यावानेव हि श्रोता
तत्त्वमस्यादिवाक्यश्रवणेऽधिक्रियते। यदि च तस्याविद्या नास्ति श्रवणमननविधानमनर्थकं स्यात्॥
अतश्चममलोच्छेदात्। सत्यवाद्यप्रसंगः सत्। का चेयमविद्या भवतोऽभिप्रेता। किं भेददर्शनमुत तत्त्वाति
रिक्तेति। यदि तावद्भेददर्शनमविद्याभ्युपेयते। तत्रेदं वक्तव्यं कथं भेददर्शनस्याविद्यात्वं किंचिद्धातोऽ
न्यता। द्विविधा अथ विद्याया अभाव इति न तावदभावः संवेदनत्वस्य प्रत्यक्षत्वात्॥ इयांस्तु विशेषः
परविद्या अपरविद्या चेति। तथा चोक्तं द्वे विद्ये वेदितव्ये परा चैवापरा चेति॥ न च पर्युदासः संभवति
न हि भेदज्ञानं ज्ञानगुणः क्रियाभावे न विघातो अन्यत्स्यात्॥ विद्येति ज्ञानमुच्यते। भेदज्ञानमपि ज्ञानमे

भ० वेसपतद्विपरीता विद्या। तत्रापि किं नित्या अनित्या वासा चमलक्षणः किं जीवस्येति॥ यद्यनादिरविद्या
१५ तदा नीम निर्मोक्षप्रसंगः तस्याः छेत्तुमशक्यत्वात् ब्रह्मवत्॥ अथादिमती कुतः सा जायते यदि
चोत्पद्येत कार्यत्वादवस्तुत्वप्रसंगः॥ तत्रावस्तुभूता विद्येति प्रतिज्ञा हीयते। नह्यवस्तुशशविषाणमु
त्पद्यते न च ब्रह्मणो विद्या तस्य विशुद्धचिद्रूपत्वान्निरतिशयानंदरूपत्वात्। न च जीवस्य ब्रह्म
व्यतिरिक्तजीवानभ्युपगमात्। प्रतिबिंबरूपस्य च जीवस्य कल्पितस्यावस्तुत्वात्॥ हंत निराश्र
या ऽविद्याभावपदवी मास्तु॥ तस्मान्न भेददर्शनमविद्या नापीश्वरस्य। किंतर्हि जीवस्य वस्तुतस्तस्य
देहादिष्वनात्मसु विपरीतज्ञानं ब्रह्मस्वरूपाप्रतिपत्तिश्च॥ तदुक्तं ग्रहणाग्रहणमविद्या सा तत्त्वम
स्यादिवाक्यश्रवणजनितया विद्यया निवर्त्तते न प्रपंचदर्शनं ब्रह्मकार्यत्वात्प्रपंचस्य वस्तुत्वे ब्रह्मै
व हि कारणात्मना कार्य्यात्मना चावस्थितं तस्मिंस्तु कथं हि ब्रह्मविषयं ज्ञानं मिथ्या भवितुमर्हति॥
यद्येवं प्रपंचस्य सत्यत्वे कथं प्रपंचस्तेमोक्ष इति॥ यस्यापि प्रपंचो मुक्तस्तस्याप्युत्पद्येत यथा सुषु
प्ति प्रलययोः स्थितिमिरूपावस्थिता विद्या पुनः प्रपंचहेतुः तद्वत्॥ अनवस्थायिनी च विद्या प्रदीप
ज्वालावत्तस्यां ध्वस्तायां तमोवदविद्या पुनरुत्तिष्ठेत्॥ ननु ज्ञानेनोन्मथितस्य कथं पुनरुत्प १५
त्तिः॥ अत्रोच्यते कथमुन्मथनं प्रतं ज्ञानस्यापि प्रपंचत्वात्प्रपंचेन प्रपंचोन्मथनं संभवति तु प्रशक्ति

त्वात्॥ अपात्मरूपं ज्ञानं यद्येवं सर्वदात्मरूपस्यावस्थितत्वात्प्रपंचप्रतिभासानुपपत्तिस्तमस
इव प्रदीपसंन्निधौ ततश्च संसाराभावाच्चिरमुक्तिप्रसंगः। तस्मादागमेनैवं धर्मोक्तव्यवस्थावक्तव्याः
न तर्केण अनवस्थितत्वात्॥ अस्मत्पक्षे मुक्तः सर्वात्मा भवति। तथा चाह सर्वात्मा भवति सर्वज्ञः
सर्वमेवाविवेशेति तद्वैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति मुक्तावस्थायामप
प्रिपंचत्वमपंचसद्भावं दर्शयति। तत्राह अस्तु तर्हि केवलादेव ज्ञानान्मुक्तिः कर्म्मनिरपेक्षात् चतुर्विधं
हि कर्म्मकारकमुत्पाद्यमाप्यं विकार्यं संस्कार्यं चेति। न तावन्मोक्षोत्पाद्यः ब्रह्मस्वरूपमुत्पाद्ये अनित्यत्व
प्रसंगात्। अतो नोत्पाद्यमपि होत्रादि कर्म्म नाप्यं कर्म्मणा ब्रह्माप्यते सर्वगतत्वेन नित्यस्वरूपत्वा
त्॥ न च क्रियया विक्रियते चर्म्मवदनित्यत्वप्रसंगात्। नापि संस्क्रियते नित्यस्यातिशयासंभवात्॥
अतः कार्यानुप्रवेशो न शक्यते उत्पादयितुमिति॥ अत्रोच्यते सत्यं त्रिविधं कर्म्म न संभवतीत्येवं
तु न शक्यते निरसितुं यद्येवं ज्ञानेनाविद्यानिवृत्तिद्वारेण ब्रह्मस्वरूपमवाप्यत इत्यभ्युपगम्यते तथा क
र्म्म सहितेनेत्यभ्युपगंतव्यं यस्तेन दानेनेति विनियोगात्। यदि च नित्यप्राप्तो मोक्षः स्यात्तर्हि यत्नेन सिद्ध
त्वात्सर्वो लोको मुच्येत॥ अथाविद्याव्यवधानात्तन्निवृत्तिद्वारेण तन्निवृत्तिश्च विद्याविरोधादिति
मन्यसे॥ अत्रोच्यते॥ तद्विपदिलंते प्रसज्यते भेदप्रतीतिनामविद्या भवतोऽभिप्रेता न तत्तद्धि यमा

एशरीरस्य कस्यचिद्देहज्ञानं विनिवर्त्तते चक्षुरादीनां तन्निमित्तत्वात् । न च निमित्ते सति नैमित्ति
मू.र. कं न भवति कर्म्मणां तद्भोगार्थत्वात् ॥ कथं भोगार्थत्वं ॥ देहेंद्रियविषयविभागज्ञानहेतुत्वात् अ
२६ पि चेतरहेतुत्वमविद्याकामकर्म्मणां बीजांकुरवद्धतः संस्कारत्वं च क्रमविरुद्ध्यमनुवर्त्तते ॥ तत
श्चाद्वैतज्ञानं बाध्यतामेति प्रतिपत्तव्ये बलीयस्त्वादपवर्गाभावः प्रसज्यते । न च बाध्यमानाकार्यं भेद
ज्ञानं तिष्ठतीति शक्यते अनुत्पत्तेन वक्तुं स्थिति निमित्ताभावात् निमित्तसद्भावे हि निवृत्तत्वात्तैमि
रिकैर्मपि मिथ्याज्ञानं पुनरुत्पद्यते । द्विचंद्ररज्जुसर्पादि भ्रांतित्वे न तिष्ठेत् प्रवृत्तिर्नोपपद्यते इ
ष्यते च शेषं च मन व्याख्याने भोजनादौ क्षुत्पिपासयोर्निवृत्तत्वात्तत्प्रेरितोऽस्वतंत्रः प्रवृत्तिबाधित
कल्पं चाज्ञानं स्थिति स्वानुरूपविरुद्धं प्रवृत्तिमनुष्ठात्वा विशिष्यते न चाविद्याया अशेषत्वं शक्यं कल्पयि
तुमवस्तुत्वात् । न हि शशविषाणस्य सावशेषत्वं वास्ति यदि चेद्देहज्ञानं सर्वात्मना निवर्तेत संप्रदाय
विच्छेदः स्यात् । असिद्धश्चायं हेतुर्निरोधादिति । मनुव्यासयाज्ञवल्क्यादीनामुपदेशकर्तृत्वोऽपि लब्धेः ॥
शक्यादिनिरूपति भस्मे हि संप्रदायोपपत्तिः ॥ तदेतदयुक्तमिति च युगपदुभयानुवृत्तिश्रुतेः ॥ निःसंबोधो
निरास्वादस्त्व स्यात्तोऽनः स्यात् ॥ चैतन्यमात्रावशेषत्वात् ॥ वदंति केचित् भागालत्वं व नेव र मिति ॥ २६
अस्मसस्ते तु न भेदज्ञाननिवृत्तिरविद्यानिवृत्तिः ॥ किं तर्हि शरीरादावनात्मन्यात्मबुद्धिनिवृत्तिः तत्र

च सिद्धो हेतुस्तन्निवृत्तौ शरीरपातादनंतरं सर्वज्ञः सर्वशक्तिर्निरतिशयसुखसंवेदी मुक्तो भवतीति
निरवद्य ॥ अपि चानेकजन्मसंचितानां कर्म्मणामारब्धानारब्धफलानां कथं तन्निवृत्तिर्ज्ञानविरोधाभावा
त् बंधकारणत्वादपवर्गहेतुज्ञानेनास्ति विरोध इति चेत् ॥ कथं बंधहेतुत्वमवगतं शास्त्रादिति चेत् ॥
न मार्गतोऽसि परीर्यं पंथानं कुर्वंतस्तेऽविद्यामात्रवादिनस्तच्युतिविरक्तं कर्म्म तद्धितार्थं गोवा अवाप्ता
र्थवादित्वादुक्त । अस्मत्पक्षे तु युज्यते यथाशास्त्राभिसत्कर्म्मसमुच्चिता ह्यात्मज्ञानादविद्याकामकर्म्म
लक्षणबंधनिवृत्तिस्तथा यज्ञादिश्रुतेरश्वं प्रवदित्यत्र दर्शयिष्यामः ॥ संख्यास्तु त्रिगुणमचेत
नं प्रधानं जगत्कारणमनुमाय तत्रैव वेदांतवाक्यानि योजयतः प्रत्यवतिष्ठंते चेतनस्याप्रत्यक्षत्वे जगत्का
रणत्वे यत्प्रतिज्ञातं शास्त्रयोनित्वं सदेव सोम्येदमग्र आसीदित्यादिवाक्यसमुत्थत्वात् ॥ तदसिद्धं
सत्शब्दो वस्तुमात्रवाची प्रधानेऽप्यवकल्पते । अतो न चेतनं जगत्कारणमिति विभाजेऽब्रवीति ईक्षतेर्नाश
ब्दं न प्रधानं जगत्कारणमशब्दं हि तत् । न विद्यते शब्दः श्रुतिर्यस्य तदशब्दं कस्मादीक्षतेरीक्षणश्रवणात
तदैक्षत बहु स्यां प्रजायेयेति ये तिईक्षते दिति धात्वर्थनिर्देशो लङ् ॥ एण्यानधातुनिर्देशोयमेति क
र्त्ता विधेयर्जते पूर्ववत्व ईक्षणं पर्य्यालोचनमध्यवसायः प्रत्यक्षत्वं तस्य चेतनस्यैवोपपद्यते ॥ अत्राह
गोणमीक्षणं न विष्यस्य चेतनेऽपि चेतनवदुपचारदर्शनात् यथा अनियत नं कूलं मा मालन्द्य कूलं

भ० पिपतिषतीति प्रयुज्यते ॥ तथा प्रधानेऽप्यात्मसन्नसोनियमेन प्रवृत्तिमाजोऽक्वचेतनोपचारो भवि
ष्यति । भवति चेह ह्यप्यचेतनयोरप्तेजसोरुपचारः तत्तेज ऐक्षतेति ॥ तस्माद्गौणमीक्षणं अत्र प्र
७ तिविधत्ते । गौणमीक्षणं प्रत्यागतशब्दात् । गौणमीक्षणं भिन्नमुक्तं कस्मात् आत्मशब्दात् सेयं देवतैक्षत हन्ताहमिमा
स्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति । तथास आत्मा तत्त्वमसि श्वेत
केतो इत्यात्मशब्दः श्वेतकेतवेन लोके असौ तस्ते न जीवव्यपदेशनिति देवता जीवस्य प्राणानां धारयि
तात्मत्वादि प्रमाणसिद्धत्वात्तत्रात्मशब्दप्रयोगो युज्यते ॥ यदि चेतनं जगत्कारणं गुणवत्ता कथेत । त
देवदेवताशब्देन परामृश्येत । ततश्चाचेतनं चेतनस्यात्मेति विरुद्धमापद्येत ततो मुख्यमेवेक्षितत्वं
युक्तं गौणत्वं प्रमाणान्तराधीनत्वात् लौकिकस्य प्रयोगस्याप्तेजसोरपि प्रकृते देवतानुप्रवेशात्तदीयमे
वेक्षितृत्वं कार्ये गतं चोपदिश्यते इत्यदोषः ॥ अन्याह आत्मशब्दोऽचेतने प्रधाने लक्षणया प्रयुज्यते । पु
रुषोपकारित्वात् । यथा राज्ञः सर्वार्थकारिणि भृत्ये आत्मशब्दप्रयोगो ममात्मा भद्रसेन इ
ति ॥ अथवा चेतनाचेतनयोः साधारणोऽयमात्मशब्दो यथा ज्योतिःशब्दः क्रतुज्वलनयोरिति । अ
त्रोत्तरं पठति ॥ तन्निष्ठस्य मोक्षोपदेशात् ॥ नायमात्मशब्दो गौणो न साधारणो भवति । प्रकृते जगत्कारणे तन्नि १७
ष्ठस्य श्वेतकेतोस्तत्त्वमसीत्युपदिश्य मोक्ष उपदिश्यते तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति या

वत्शरीरान्न विमोक्ष्यते प्रारब्धकर्मफलभोगप्रतिबंधात्तावदेवास्य विदुषश्चिरं ॥ भुक्ते तु कर्म्मणि
प्रतिबंधाभावादयमलं संपत्स्यत इत्यर्थः ॥ तकारलोपो अत्र छांदसो द्रष्टव्यः ॥ यदि वा चेतनं प्रधानं
तत्त्वमसीति ग्राहयेत्ततो मिथ्यावादिशास्त्रं न प्रमाणं स्यात् ॥ मातापितृवचनादपि प्रत्ययितत
रं यत्पामरं तत्त्वादिशास्त्रं तत्त्वदो मिथ्या दृष्टे मोक्षोपदेशानुपपत्तिः ॥ सेनायतौ तु प्रमाणांतरवशा
त् उपचारो युक्तं ॥ न चायं साधारणः अनेकशक्तिकल्पनाया अप्रमाणत्वात् । तत्र गौणत्वात्प्र
योग उपपद्यते ॥ तत्रार्थापत्तिलभ्या वाचकशक्तिकल्पनमयुक्तं यथाग्निर्माणवक इति चेतनोपका
रित्वं चालोच्य अनात्मन्यात्मशब्दो लोकेऽप्रयुज्यते । अतात्मनि द्विपाले तियत्र पुनर्गौणी वृत्तिर्न संभवति
तत्रानेकशक्तिकल्पना । यथा अक्षाः पादा इति । ज्योतिःशब्दोऽपि तमःप्रतिपक्षे मुख्यः सच गौणत्वात्
क्रतौ प्रयुज्यते ॥ ज्योतिषी स्तोमा अस्येति ज्योतिष्टोमोऽर्थवाददर्शनात् ॥ एतानि वाव तानि ज्योतींषि
य एतस्य स्तोमा इति स एव प्रकृतो वसंते वसंते ज्योतिषा यजेतेति निर्दिश्यते ॥ इतश्चनात्मशब्दो
७ गौणः हेयत्वावचनाद्यदि अनात्मैव चेतनं प्रधानं जगत्कारणं तत्त्वमसीति श्वेतकेतोरुपदिष्टं स्यात्
सच पित्रोपदिष्टं प्रमाणं कुर्वन्नीलंधगोलांगूलन्यायेन न कदाचिन्मुच्येत । तस्मात्ततो हेयत्वं व
क्तव्यं ॥ न चावोचत् ॥ सन्मात्रकारणनिष्ठैव षष्ठप्रपाठकपरिसमाप्तिः ॥ अतः सच्छब्दवाच्यं चेत

भ०

१८ नं ब्रह्मेति । निश्चीयते । प्रतिज्ञाविरोधाच्चोक्तम् तमादेशमप्राक्ष्यो येनाश्रुतं भवत्यमतं मतमविज्ञा
तं विज्ञातमिति । प्रधाने विज्ञाते हि तत्कार्यं महदादि विज्ञातं स्यात् । न तु भोक्तृवर्गः । ब्रह्मणि पुनः का
रणे विज्ञाते भोक्तृभोग्यवर्गौ विज्ञातौ स्यातां तदनन्यत्वात् ॥ इतश्च प्रधानं न सच्छब्दवाच्यं । स्वाप्ययात्
यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति । स्वमपीतो भवति तस्मादेनं स्व
पितीत्याचक्षत इति । स्वपिति नाम निर्वचनेन पुरुषमपीतो भवतीति स्वस्मिन्प्रलीतेः सच्छब्दवा
च्यो जीवस्याप्ययं दर्शयति । यदि प्रकृतं चेतनं स्यात्तत्तस्मिन्नचेतने स्यात्त्वाप्यय उपपद्यते अप्य
यः प्रलयः सच्छब्दवाच्ये नैवाभावः ॥ तस्मान्नाचेतनं सच्छब्दवाच्यमितश्च । गतिसामान्यात् ॥ ग
तिरवगतिः अथवा वगतिः प्रवृत्तिस्तस्यास्तुल्यत्वात् ॥ सर्ववेदान्तेषु जगत्कारणावगतिस्तुल्या
न तार्किकसमयवद्भिन्नं न तस्या । यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेर
न्नेवमेवैतस्मादात्मनः प्राणा यथायतनं प्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका इति । तस्माद्वा ए १८
तस्मादात्मन आकाशः संभूत इति । यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तप इति मुण्डके तस्मादात्मैव
कारणं यत्तत्सर्ववेदान्तानां संबाधितं ॥ इतश्च श्रुतत्वाच्च । साक्षादीश्वरः सर्वज्ञो जगत्कारणं
दि

२

श्वेताश्वतराणां मंत्रोपनिषदि श्रूयते ॥ न तस्य कश्चित्पतिरस्ति लोके न चेशिता नैव च तस्य लिं
गं ॥ स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप इति ॥ तस्मात्सर्वज्ञं ब्रह्म जगतः कारण
मिति सिद्धं । स्थितं शास्त्रयोनित्वं ब्रह्मणः । तत्कारणात्मना कार्यात्मना च द्विरूपेणावस्थितमित्यु
क्तं ॥ किं पुनस्तत्कार्यरूपं निर्दिश्यते ॥ क्व वा तद्विपरीतं कारणमेवोपदिश्यत इति ॥ तद्विवेकदर्शनायो
त्तरः प्रारम्भो वाक्यार्थेषु वचनव्यक्तीनां विचित्रप्रतिभानोत्पत्तेः ॥ शाब्दप्रमाणप्रकारे देवस्तुत्यादिभिः प
ड्विस्तदनुसारिणा च तर्केण सर्वत्र निर्णयः क्रियते परानां परस्परसमन्वये वाक्यैकवाक्यत्वे च तेषां सा
मर्थ्यात् । आनन्दमयोऽभ्यासात् । तैत्तिरीयके अन्नमयं प्राणमयं मनोमयं विज्ञानमयं चानुक्रम्याम्नायते । त
स्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानन्दमय इति तत्र संशयः । किमानन्दमयशब्देन परं ब्र
ह्मोच्यते । किं वान्यो ततोऽर्थान्तरमिति किं पुनरत्र युक्तं ॥ आनन्दमयः प्राप्ते धर्मधर्म्यौ हि रूपगतादिर्व्यप
दिश्यते । न मुख्यः परमात्मा कस्मात्प्रियाद्यवयवयोगात् ॥ शारीरत्वश्रवणात्तस्य प्रियमेव शिर इति ॥ य
थान्नमयादीनामवयवयोगादमुख्यमात्मत्वमेवं तत्रापि स्याद्विकारार्थ एव कश्चिदात्मा निर्दिश्य
ते ॥ आनन्दमय इति च विकारे मयट्प्रत्ययश्रवणात्तस्यैष एव शारीर आत्मा यः पूर्वस्येति

ब्र० शरीरयोगः श्रूयते॰ तस्य पूर्वस्य विज्ञानमयस्यैष एव शारीरे भवः शारीरः आत्मायः स आयं नन्मय
इत्यर्थः तस्मात्संसार्येवात्मानंदमय इति प्राप्ते ब्रूमः परएवानन्दमयो न विकारापन्न कुतो ऽभ्यासात्
१८ आनंदशब्दस्यापि हि एव आकाश आनन्दो न स्यात् सैषानन्दस्य मीमांसा आनन्दो ब्रह्मेति व्यजानात् स
नंदं ब्रह्मणो विद्वानेतमानंदमयमात्मानमुपसंक्रामतीति यस्तु न कृतकमन्नमयादिवदमुख्यं आ
त्मनायं दोषः सर्वांतरश्रुतेः आनन्दमयः परमात्मेति निश्चीयते अन्नमयादीनामपि हि कंमातर
त्वंश्रवाचं इत्यायेन प्रतिपत्तिसौकर्यार्थमुपन्यस्यते॥ सत्यज्ञानमनंतं ब्रह्मेति प्रकृतस्य ब्रह्म
णः प्रतिपिपादयिषितत्वात्॥ उपक्रमोपसंहारयोरेकार्थत्वमेकवाक्यत्वात्॥ यथा जाते वै
श्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते यदष्टाकपालो भवतीत्यष्टत्वादीनामुपन्यासो द्वादश
कपालस्तुत्यर्थ एवमत्राप्यन्नमयाद्युपन्यासो न मुख्यार्थप्रतिपत्त्यर्थो नोपासनार्थो वा
वाक्यभेदप्रसंगात्। न चात्रोपास्येति विधिः श्रूयते फलं त्वन्यतः सिद्धमन्नमयेन मनोमयेन नयं नानो १८
पास्येति प्रतिवाक्यं विधिः॥ फलश्रुतिर्वाक्यांतरपुरुषार्थो विवक्षितो वगम्यते। तस्मादानन्दमय
प्रतिपादनं ब्रह्मप्रकरणं न स्वनिरुपमिति॥ यदुक्तमवयवयोग इति। तत्रायो ब्रह्मापि पुरु

षविधत्वकल्पनार्थो नावयवशरीरप्रतिपत्त्यर्थ इत्यदोषः। विकारशब्दान्नेति चेन्न प्राचुर्यात्॥ वि
कारार्थवाचिनो मयटः प्राचुर्यदर्शनाद् अन्नमयादिवत् अमुख्य आत्मानन्दमय इति चेत्तन्न प्राचु
र्यार्थेऽपि मयटो विधानात्। तत्प्रकृतवचने मयडिति हि प्रभूततायां विधीयते यथान्नमयो यज्ञ
इति तद्धेतुव्यपदेशाच्च॥ तस्य ब्रह्म तस्य ब्रह्मण आत्मानन्दहेतुत्वं व्यपदिशति श्रुतिः। एष ह्येवान
न्दयातीत्यानन्दयतीत्यर्थो यो ह्यन्येभ्यो धनं प्रयच्छति स प्रचुरधन इति प्रसिद्धमेव यो जीवानान
न्दयतीति गम्यते मांत्रवर्णिकमेव गीयते। यन्मंत्रेणोक्तं तन्मांत्रवर्णिकं सत्यं ज्ञानमनंतं ब्रह्मेति त
देवात्रानन्दमयशब्देन गीयते नेतरोऽनुपपत्तेः॥ इतरो जीवः संसारी आनन्दमयः कस्मादनुपपत्तेः।
आनन्दमयं प्रकृत्य सोऽकामयत बहुस्यां प्रजायेयेति स्रष्टृत्वं श्रूयमाणं जीवे नोपपद्यते सत्यं च
त्यचाभवदिति च सर्वात्मकत्वं भेदव्यपदेशाच्च इतश्चानानन्दमयः संसारी प्रकृतमानंदमयं रस
शब्देनोक्त्वा ततो द्वितीयं लब्धारं दर्शयति रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवतीति। नहि लब्धैव लब्धव्यो
भवतीत्यत्र केचित्स्वमतिकल्पितदर्शनप्रदर्शनाय सूत्रार्थं विनाशयंतो व्याचक्षते॥ नहीश्वरादन्यः
संसारी विद्यते। स एव संसारी। तत्कथं नेतरोऽनुपपत्तेर्भेदव्यपदेशाच्चेति कथं सूत्रद्वयमिति चेत्। नैव

दोषः ऽपाधिकृतभेदमात्राङ्गीकरणादित्युच्यते यथा घटाकाशः पराकाशादित्याकाशस्य भेदव्यप
भट. देशः कल्पनामात्रेणेति ॥ तदेतदुक्तं यथाश्रुतसूत्रार्थं भक्त्याख्यानस्यापत्याप्तत्वात यथा विम्ब
२० रान्यस्य संसारित्वं जीवपरयोश्च भेदाभेदौ तयोस्तत्रांशेनानांशव्यपदेशादित्येवमादौ विस्पष्टं वक्ष्या
मः कामाच्च नानुमानापेक्षेति ॥ ननु रसस्तत्तु लास्यानन्दहेतोः प्रधाने विद्यमानत्वात्तदेव प्रधानमानन्द
मयस्यात्रेत्युच्यते ॥ अनुमीयत इत्यनुमानं प्रधानं तदपेक्षा यास्मिन्नानन्दमयवाक्ये नास्ति कुतः कामा
च्च ॥ सोऽकामयत बहु स्यामिति ॥ कामयितृत्वाच्चेतनधर्मो नाचेतनस्य ॥ गतिसामान्यस्य प्रपञ्चनायेदं प्र
सङ्गादुक्तं ॥ अस्मिन्नस्य च तद्योगं शास्ति ॥ इतश्चानन्दमयः परो न संसारी न प्रधानं ॥ अस्मिन्नान
न्दमये प्रकृते ऽस्य जीवस्य प्रतिबुद्धस्य तद्योगं तेन योगं ब्रह्म किं शास्ति शास्त्रं ॥ यदा ह्येवैष एतस्मिन्नदृश्ये
नात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते ऽथ सोऽभयं गतो भवतीति ॥ तदेतस्मिन्मुक्तिशास्त्रं परमा
त्मपरिग्रहे ऽवकल्पते नान्यथेति स्थितं ॥ अत्र केचिदिमं सिद्धान्तं दूषयित्वा पुच्छब्रह्मप्रतिपादकतां
प्रपन्नं ते ऽनन्दमयस्य ब्रह्मत्वं विकारार्थमयट्प्रवाहपतितत्वात् ॥ अयमपि विकारार्थ एवेत्युक्तः प्रियशि २०
रस्त्वाद्यवयवयोगाच्च ॥ ब्रह्मपुच्छं प्रतिष्ठेति च एकस्यावयवावयवित्वासामञ्जस्यात् ॥ ब्रह्म पुच्छमित्यत्र
च ब्रह्मशब्दप्रयोगात् असन्नेव स भवति असद्ब्रह्मेति वेद चेदिति चानुकर्षात् ॥ किं चानन्दमये ब्रह्मण्य

सुप्रयुज्यमाने सविशेषेऽपि निर्विशेषं ब्रह्म लक्ष्यते यतो वाचो निवर्तन्त इति ॥ किं चानन्दप्रचुर इत्युक्ते दुःखा
स्यत्वं न विगम्यते प्राचुर्यस्य प्रतियोग्यल्पतापेक्षत्वादिति ॥ प्रातिपदिकमात्रास्याभ्यासाच्च नानन्दमयाभ्यासः श
क्यते ऽवलम्बितुं ततो ब्रह्म पुच्छं प्रतिष्ठेति ब्रह्म प्रतिपत्तव्यं आनन्दमयस्तु संसारी कश्चिदिति ॥ सूत्राणि त्वेवं
योजयितव्यानि ॥ आनन्दमय इत्यस्मिन्वाक्ये ब्रह्म पुच्छं प्रतिष्ठेति प्रकृतं ब्रह्म प्रतिपत्तव्यं ॥ कस्मान्न विकारस्या
नन्दप्रातिपदिकस्याभ्यासात् विकारशब्दान्नेति चेद्विकारशब्दो ऽवयवशब्दः पुच्छशब्द इत्यर्थः ॥ तत्रोत्तरं प्रा
योक्तेः सर्वत्र पुच्छशब्दप्रयोगानुक्तसादृश्यापि पुच्छशब्दः प्रयुक्तो न च तस्य परत्वेन उक्तं परायणं सर्वस्या
नन्दजातस्येति पुच्छशब्दः प्रयुज्यते ॥ न पुच्छत्वविवक्षया परायणत्वविवक्षया ॥ एवं यथासम्भवं योजनीयानी
त्यत्र वदामः ॥ स्वयं तु सन्तोषितहेतो नास विजानीते ये गम निकानश्रुत्यनुगता सूत्रानुगता वा कथं मि
हतावदन्यस्यान्तरतमस्यासंकीर्तनात् प्रकरणपर्यवसानमानन्दमये उपपद्यते ॥ आन्तरश्रुतिश्च तस्मा
त् सर्वत्र बोधयति यद्यप्यन्नमये विकारार्थो मयट् प्रत्ययः प्राणमयादिषु तन्न विकारार्थः सम्भवति पंच
वृत्तेः प्राणस्यैकत्वान्न प्रकृतिविकारभावः सम्भवति तत्रायमप्येतन्निश्चित स्वार्थे मयट् प्रत्ययो व
त्तिवाक्ये स्वल्पविवक्षयाचाततः परेष्वपि विकारविवक्षा नास्तीत्यानन्दमये द्विधा मयट् प्रत्ययो घटते ॥
यद्वानन्द एवानन्दमयः प्रजातानेवा भवतीत्येकस्यापि शब्दस्य सामर्थ्याद्भिन्नार्थता विवक्षया ॥

ब्र॰

२१

श्रुत्या ब्रह्मानंद
स्य निरतिशयत्व
प्रतिपादनात्मि
ति योगपर्यत्वापु
त्त्वात्सूत्रबोधा
पादनं परिहृत
मित्यर्थः ॥४॥

यथापौर्णमास्यां पौर्णमास्या यजेतेति सलक्षणतः कालवाचीत्तृतीयातः कालस्तु कर्म्मवचनो बहुधापि विवक्षा
लोकवेदयोः शब्दप्रयोगेषु ॥ यदप्युक्तं प्रियशिरस्त्वाद्यवयवसंकीर्त्तनादि तितद्विरुद्धमन्यार्थत्वात् ॥ अलौ
केऽपि सर्वज्ञतानंदस्त्रीति स्वामान्ये मोदादयश्च प्रीतिविशेषास्तत्सर्वमस्येवानंदस्यांशा इति प्रदर्शनार्थत्वात् ॥
तथा च श्रुतं तत्रमेव तस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति एवमपर्यंच मयटः प्रयोगोऽपि प्राचुर्यमानं
दः परमेश्वर इति शततगुणोत्तरक्रमेण प्रतिपादनात् ॥ अतएव ब्रह्मविदूतेव कुक्ष्यस्यान्याऽनपेक्षत्वादिति
नहि स्वात्मन्येव प्राचुर्यमल्पत्वमपेक्ष्यते यथा प्रचुरप्रकाशः सवितेतीदुवह्निप्रभृतीनपेक्ष्य प्रयुज्यते ।
मोदादीनां च जीवगतानुभवत्व प्रभेदात्तन्निवृत्त्यर्थं कारणंगतमानंदगुणम यद् प्रत्ययेन विनैवोपसंहर
त्यानंद आत्मेति ब्रह्मपुच्छं प्रतिष्ठेति च प्रस्तुतस्यानंदज्ञातस्याश्रयभूतं निर्दिशति न हि गुणो गुणिनमं
तरेणात्मानं लभते शीलोत्सादीवत् ॥ एतदुक्तं भवति पूर्वं वर्तरु सुविधकल्पनया निरतिशयानंदगुणं ब्रह्मेत्य
न्यथा सुखरहितं ब्रह्म वैशेषिकादिमतवत्तथा मोतिप्रसंगं च विज्ञानमानंदं ब्रह्मेति सति चैवमनंतरश्लो
केऽपि सत्येवसत्यवतीति गुणीमात्रनिर्देशेऽपि गुणप्रतिपत्तिः सगुणस्य ब्रह्मणः सस्तत्वाद्यथा सा वा एषा
सर्वदेवता यद्गावो गावो यथा यज्ञ आते ति व्रागुणयापान्नतायां ब्रह्मतायां केवलेन गुणिवचनेन सगुणगृह्य
ते गागा चैव मायैर्मैतो तद्ब्रह्मीलेन स्मिन्मंत्रे ॥ यदप्युक्तं निर्विशेषं ब्रह्मात्र विवक्षितमिति तदप्ययुक्तमानंदगु
णस्य ब्रह्मणो विवक्षितत्वात् ॥ अतएवोत्तरत्र केवलेन गुणवचनेन गुणी निर्दिश्यते सैषानंदस्य मीमांसा आ

लौकिकमीमांसादी
नामेतत्संशब्दबो
धकमित्यर्थः ५

२१

नंदाध्येयस्य विमानिभूतानि जायंत इति ॥ यतो वाचो निवर्त्तंत इति च रागादिदोषदूषितयोर्वाङ्मनसो र
गोचरं ब्रह्मेत्यर्थः ॥ शुद्धयोस्तु गोचर एव ॥ तथा च श्रुतं तरं दृश्यते । त्वग्र्या बुद्ध्या ज्ञानप्रसादेन विशुद्ध
सत्त्व इति च तस्मान्निरवद्यं ॥ आनंदमयेनैवोपसंहारः क्रियते पुरस्तादानंदप्राचुर्यं प्रतिपाद्य एवं तमानंद
मयमात्मानमुपसंक्रामतीति स च तस्य ब्रह्मत्वेव कल्पते ॥ भार्गव्यां च वारुण्यां विद्यायां विदुषो मुक्तिफल
मुपसंहर्त्तुमानंदमय्यास्य श्रुतिः प्रवृत्ता एतमानंदमयमात्मानमुपसंक्रम्य इमां लोकान्कामान्नी कामरू
प्यनुसंचरन्निति विषयत्वादुपसंक्रमश्रुतिर्वाध्येत ॥ सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता सहेति
सर्वैः कामैः सह ब्रह्मत्वं प्राप्नोतीत्यर्थः भिन्नत्वेऽत्यन्तयोर्ब्रह्मव्योऽन्यथा हि ब्रह्मणोऽप्राधान्यं स्यात्
सह युक्तेऽप्रधान इति स्मरणात् ॥ यथा सहैव यावास्तरं प्रहरतीति प्रस्तरेण सह शाखां प्रहरतीत्यर्थः
तस्मात्समुदायपरं पराचतांप्राप्यानंशोऽनन्नमिति स्थितं ॥ अन्तस्तद्धर्मोपदेशात् ॥ अथ य एषोऽन्तरादित्ये हिरण्म
यः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमे
वमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेत्यधिदैवतं ।
अथाध्यात्मं य एषोऽन्तरक्षिणि पुरुषो दृश्यत इति छान्दोग्ये श्रूयते ॥ तत्र संशयः किमादित्यचक्षुषिचोप
स्यत्वेन कश्चित्संसारी निर्दिश्यते किं वेश्वर इति किं तावत्प्राप्तं ॥ प्राप्तोत्कर्षः कश्चित्संसारीति कुतो रूपवत्व
णादरूपाच्च परादेवतायाः अशब्दमस्पर्शमरूपमव्ययमिति श्रुतेराधारश्रवणात् सर्वगताच्च परादेवतायाः भ

न्ति उपसंक्रमणं च
विद्यासामर्थ्याद
र्चिरादिमार्गेण सं
सारमुक्तमती
त्य हिरण्यगर्भप
र्यंतसंप्राप्तिः पर
मात्मैकता । तत्र
यथानंदमयस्य
ब्रह्मत्वं तस्या नि
[illegible]संक्रमण
६

र्यमप्यादावचनात्रत्रैव मुष्मात्पराञ्चो लोका ये चैतस्माद्देवकामाश्च इति तस्मादादित्यादिष्वेत्र शब्द इति प्रा
ब्र. प्तिरूपः॥ अंतर्मंडलासंतरे चाक्षिणि चोपदिश्यमानः परएवात्मा नर विवु मर्हीति तद्धर्मोपदेशात्सर्व
पाप्मोदय्ये नामतस्य धर्म्मः तन्निर्वचनार्थं नेवे नमुन्नामानं करोति। तस्योदिति नामेत्यादिपुरुषस्यापित
२२ द्वनामाभिदिष्यते। यत्नामतत्नामेति न्व संसारिकश्चित्सर्वपापनिर्मुक्तोस्ति अन्यथा संसारित्वानुपपत्ते
र्नचैवाश्रुतिः॥ रूपश्रवणेतु शक्याहेत्वनावात्। ननुरूपादिश्रवणं हेतुः न परमेश्वरस्यापि सर्वशक्तित्वादु
पपासकानुग्रहाय रूपोपादनसम्भवात्। किन्मायामयं रूपेनेतिक्रमः। पारमार्थिकमेवैतत्। यथाभूतार्थज्ञा
पकं हि शास्त्रं यत्र कारणमात्रस्वरूपं विवक्षते तत्र तत्परास्ताः श्रुतयो अस्थूलमनण्वह्रस्वमदीर्घमरूपमव्ययमि
त्येवमाद्याः। उपासनव्यपदेशाश्चोपासनार्थ एवमाद्या वचनं चाधिदैवाध्यात्मविभागापेक्षया सर्वेशित्व
त्वमेवानेनप्रकारेणोक्तं भवति। न हि निरंकुशमैश्वर्यमीश्वरादन्यत्राव कल्पते सैव कलस्मा मत्तदुक्तं त
द्यजुस्तदुक्तेतिसर्वात्मत्वं मन्यत्र नावकल्पते। तद्यदिदीप्याणां गापत्तेतंते गायत्ति लोकिकस्यापि मानस्यो
लत्विषयत्वं दर्शयति। तदन्यत्र नावकल्पते भेदव्यपदेशाच्चान्यः इतश्चादित्येत्रशादन्यः कथं भेदव्यप
देशात् य आदित्येतिष्ठन्निति॥ आकाशस्तल्लिंगात्॥ छान्दोग्ये श्रूयते अस्य लोकस्य का गतिरित्याका २२
श इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंते। आकाशं प्रत्यस्तं यत्याकाशो ह्येवेभ्यो
ज्यायानाकाशः परायणमिति तत्रसंशयः किमाकाशशब्देन भूताकाशमुच्यते किं वा परं ब्रह्मेति कुतः सं

शयप्रयोगदर्शनादुभयत्र भूताकाशे तावत्प्रसिद्धः प्रयोगः परस्मात्मन्यप्याकाशो वै नामरूपयोर्निर्व
हिता ते यदंतरा तद्ब्रह्मेति अतो युक्तः संशयः। किं तावत्प्राप्तं लोकप्रसिद्धेर्भूताकाशोगृह्यते। ननु सर्वभू
तोत्पत्तिप्रलयवचनं भूताकाशे नोपपद्यते। पवनाद्यपेक्षयोत्पत्तिभृत्यस्तमयश्रुतिरपि काशेऽवकल्पिष्यति॥ अ
त्र कश्चिदाह। ननु पूर्वपक्षे कर्म्मशास्त्रमिदं प्राप्नोति न विद्याशास्त्रमिति। अत्रोच्यते। केनैतत्प्रतिभाषितं
वेदांतशास्त्रेण कर्म न विधातव्यमिति न वा तु कर्म्मशास्त्रे को विरोध। सिद्धांताभिप्रायेण तु ब्रह्मशास्त्रमि
ति नीयते न हि पूर्वपक्षो वेदांतवाक्यार्थे मीमांसानिर्वर्तित्वात्॥ एवं प्राप्तेभिधीयते आकाशः परमेश्वरः स्या
त्। कुतः तल्लिंगात् तल्लिंगं ह्यन्यत्राचारि धर्मः तेन धर्मिविशेषः परिच्छिद्यते भूमेनेवाग्निः॥ किं पुनस्तल्लिं
गं सर्वभूतोत्पत्तिप्रत्यस्तमयश्च॥ न हि सर्वेषां भूतानां भूताकाशादुत्पत्तिः प्रलयो वा श्रूयते। किं तर्हि पर
मेश्वरादेव। भूतशब्दश्च जीवाधिष्ठितभूतवनो महाभूतवचनश्चोभयथोपपद्यते तत्राकाशस्याप्युत्पत्तिप्रल
योपरायत्तावितिसर्वभूतश्रुतिः॥ तत्र नावकल्पते तस्मादाकाशः परमात्मा प्रयोगश्च दर्शितः क्रियायोगेन वा
आकाशेभिविधो सर्वप्रत्यवभाप्यप्रकाशत इत्याकाशः तत्साहचर्यादेवेति॥ अत एव प्राणः॥ या देवता प्र
स्तावमन्वायत्तेत्युपक्रम्य श्रूयते कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमे
वाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्तेति तत्र संशयः किं पंचवृत्तेः प्राणस्य प

भट· ग्रिग्रहः किं वा परस्योपादानमिति लोकप्रसिद्धेः पंचवृत्तेः परिग्रह इति प्राप्ते क्रमः ॥ अतएव सर्वं निर्दि
श्य तल्लिंगात्प्राणः परमात्मा संवेशनोद्गमनं पारमेश्वरं लिंगं ॥ अभ्युज्जिहते इत्युद्गमनमुत्पत्तिरित्यर्थः ॥
२३ ननु पूर्वेणैव न्यायेन सिद्धत्वात्स्पष्टार्थो नन्योक्तोय द्विवातुल्याशंकास्यात्ततो युक्तमारंभं ॥ अत्रोच्यते ॥
पूर्वत्रोत्पत्तिप्रलयो न श्रुतिप्रसिद्धो भूताकाशे ॥ अत्र पुनः प्रसिद्धौ ॥ कथं यदा वै पुरुषः स्वपिति प्राणं त
र्हि वागप्येति प्राणं चक्षुः प्राणं देवाधिपुनर्जायते इति प्रत्यक्षं चैतत्प्राणवृत्तौ वर्त्तमानायामिंद्रियवृत्तयः
परिलुप्यंते भूतानां चेंद्रियसारत्वात्तदुद्गमनसंवेशनवादी वाक्यशेषस्तेषामेवोद्गमनसंवेशनपर
इति न विरुध्यते ॥ किं चोद्गीथप्रतीहारयोरुक्तादित्यो देवते तयोश्चान्नं तत्साहचर्यात्प्राणोऽपि त
थाभूतो ग्राह्य इति विशेषाशंका ॥ परिहारस्तु न भूतानां संवेशनोद्गमनं श्रूयते करणवृत्तिमात्रोपसं
हारः श्रूयते ॥ तत्र च भूतोद्गमनसंवेशनवादिनी श्रुतिरपराधिता स्यात् इपि च स्वाय काजापेक्षया संवे
शनं व्याख्येयमिह वा विशेषेणाश्रूयते तत्परमात्मपक्ष एव युज्यते ॥ अतएव श्रुत्यानिर्णीयते साहचर्यमकिं
चित्करं ॥ यथैवान्नादित्ययोः परस्परवैलक्षण्यमेवं ताभ्यां प्राणस्य प्राणं प्राणानन्धनं सौम्यमन इति २३
परस्मिन्नपि प्राणशब्दप्रयोगात् ॥ प्रकर्षेणानिति स्पंदते चेतते तस्मिन्नकृत्स्नं जगदिति प्राणः ॥ ज्योतिश्च
रणाभिधानात् ॥ अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषु लोकेष्विदं वाव

तद्यदिदमस्मिन्नंतःपुरुषे ज्योतिरिति ॥ तत्रायमर्थः सांशयिकः किं ज्योतिःशब्देनादित्यादिज्योतिरभिधीयते
किं वा परमात्मेति ॥ प्राणाकाशयोरसाधारणधर्मश्रुतेर्निर्णयः ॥ कुतः तथा सर्वपाप्मोदयश्रुत्यामंडलेप्रक
रणांतरश्रुत्याच्चानंदमयोऽन्नतु निर्णायकवाक्यशेषाश्रवणात्प्रकरणानुवृत्तेश्चासिद्धत्वात्त
थुत्यादनार्थमारभ्यते किं तावत्प्राप्तं ज्योतिःशब्देन तमसो निवर्त्तकं प्रसिद्धेः परिगृह्यते दीप्यत इति च त
स्यैवोपपद्यते ॥ परमात्मनि तु न ज्योतिःशब्दः प्रसिद्धिः नवदीप्तिक्रियां कुर्वन्नास्ते ॥ विश्वतः पृष्ठेष्वि
तिवाधारवत्त्वं तस्मिन्नोपपद्यते ॥ द्युमर्यादत्वं च सर्वगतत्वात् ॥ ननु कार्यज्योतिषोऽपि द्युमर्यादत्वमसि
द्धमसिद्धमर्गापि दिवोदर्शनात् ॥ अस्तु तर्हि प्रथमजमत्रिवृत्कृतं तेजः न तस्य प्रयोजनाभावात् ॥ ननु
चेदमेवोपासनं प्रयोजनं भवतु ॥ न त्रिवृत्करणस्य सर्वप्रयोजनार्थत्वात्प्राग्त्रिवृत्कृतस्य प्रसि
द्धमस्तित्वं द्युमर्यादत्वं चासिद्धं ॥ एवं तर्हि कार्यं ज्योतिरेवास्तु तस्योपासनार्थं द्युमर्यादत्वं न तु निःप्र
देशस्य ब्रह्मणः चतुष्पाच्छ्रुतो नवतीत्यन्य फलश्रवणं द्वेषे वंप्रान्ते अभिधीयते ज्योतिः परं ब्रह्म कुतः ॥ पू
र्वत्र चरणाभिधानात् त्रिपादस्यामृतं दिवीति इदं सुकृतं नवति प्रकृतं ब्रह्मास्मिन्वाक्ये प्रत्यभिज्ञाय
ते प्रसिद्धानुवादात् ॥ कथं यच्छब्देन व्यपदेशात् ॥ यदतः परो दिवो ज्योतिः प्रसिद्धं इदं वावतदिति विशेष
विधानात् कौक्षेयेन लेपरं ज्योतिः ॥ उपास्योपासनीयमिति तात्पर्यार्थे ज्योतिःशब्दो ब्रह्मणि प्र
प्रयुक्तस्तु तदेवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमिति ॥ दीप्यत इति चोपपद्यते नित्यप्रकाशरूपत्वा

भ॰ त्ववर्तमानप्रत्ययश्चैवमुपपद्यते ॥ अधिकरणं निर्दिष्टं शब्दोपासनार्थोद्भूमध्यादित्वं च संसारविषया
२५ त्वाजलौकात्मकादादित्यमंडलात्परमवस्थितं कारणरूपं ब्रह्मलक्षितमित्यर्थः अत्र मस्तुषु सारस्यैः पादै
परिहितं तैरसंस्पृष्टं कारणरूपं ब्रह्मलेति विवक्षितोच्यते न पुनरव्यापित्वविवक्षयेत्यदोषः यस्तुन
श्चस्तुष्पः श्रुतो भवतीत्यप्यफलत्वमुक्तं तदप्युपपन्नं न हि द्रूयते फलाय ब्रह्मोपासननियमोस्ति यत्र यु
योपासनं तत्र तत्फलं । तथा चाग्निरहस्ये वाजिनां श्रुतिः तं यथा यथोपासते तदेव भवतीति । छंन्दो
भिधानार्थेति चेन्न तथा चेतोर्पणनिगदात्तथा हि दर्शनं गायत्री वा इदं सर्वं भूतं यदिदं किं चेति गायत्र्या
ख्यस्य छंन्दसोभिधानान्न पूर्वप्रकरणे ब्रह्म निर्दिष्टमस्तीति चेत् । न तत्र छंदोभिधानं तथा छंन्दो
वचने न गायत्रीशब्देन संख्यासामान्येन चतुर्भिः पादैः पादश्च ब्रह्मोभिधीयते तस्मिंश्चित्तसमाधानोप
देशविवक्षया एवमन्यत्रापि संख्यासामान्याच्छंदोभिधायी छंदोऽर्थान्तरे प्रयुज्यमानो दृश्यते ॥ तद्य
था । ते वा एते पंच येपंच दशसंत इत्युपक्रम्याह सैषा विराडन्नादीति संवर्गविद्यायां । एवं छंदसि
न ब्रह्मोपासने ॥ अत्र पक्षे श्लिष्टत्वे गायत्री छंदसि ब्रह्मोपासनमिति । तन्निरस्तं भवति । न चात्र प्र
सिद्धा गायत्री प्रत्यभिज्ञायते सेधा च तुष्पदा षड्विधेति षडक्षरैः पादैश्चतुष्पदा गायत्री निर्दिश्यते ॥ २५
प्रसिद्धा तु त्रिपदाष्टाक्षरैः पादैर्यजिनसने यिनो तु यामे वा र्थमत्वाहे षैवसे लुपनयकाले अधिगता

प्रत्यभिज्ञायते पादकल्पना ॥ तत्त्वात्मपाउपास्या नेदेपि प्रकारभेदादेव सर्वत्र विद्याभेदः शाखिल्य
विद्याभेदा । एतावानस्येति पुरुषसूक्ते मंत्रः तत्र सूक्तं श्वेताश्वतराणां परविद्याधिकारे पठितं तत्र श्व
नमंत्रेण छंदो निरूपितीयं श्रुतिर्नोपपद्यते छंदोमात्राभिधाने तद्वेतद्दरास्यनर्कं इति । तस्माद्दयमस्या
यच्चत्रीभ्रालणस्य जात्पर्यार्था विकारयादेर्विशिष्टब्रह्महृदयकमलेदास्यालोपासनपर्यंतमुपास्यमभ्रमप्रतत्व
कः जापेति ॥ अप्यय दत्रइतिच प्रतीकोपासनमन्यदेवफलां तरायेति ॥ भूतादिपादव्यपदेशोपपत्तेश्चैवं दर्शं । नार्थे
प्रकृतं ब्रह्मेति भूतादिपादव्यपदेशोपपत्तेः भूतपृथिवीशरीरहृदयानि निर्दिश्याह सैषा चतुष्पदा षड्विधा गा
यत्रीति वाक्प्राणस्यां च षड्विधत्वं षडक्षरैः पादैरक्षिस्ति चतुष्पदा गायत्रीति । स्मरति च इंद्रः शचीपतिर्व
लेन पीडितः दुश्च्यवनो वृषा समरसत्वा सहेषड्विति ॥ शेन कादस्य उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यवि
रोधात् सर्वत्र त्रिपादस्यामृतं दिवीति द्यौरधिकरणत्वेनोपदिष्टा अत्र पुनः पंचम्या अतो अपस्य भिज्ञान
मिति चेन्नायं दोषः उभयस्मिन्नप्यविरोधात् । सप्तम्यंतपंचम्यंते चैकत्वं न विरुध्यते ॥ यथा वृक्षाग्रे श्येनो वृक्षाग्रात्परतः
श्येन इति । तस्मात्परमेव ज्योतिः शब्दवाच्यं न कार्यं ज्योतिरिति सिद्धं प्राणस्तथानुगमात् अस्ति कौषीतकी ब्राह्म
तर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण चेत्यारभ्याम्नाता । तत्र श्रूयते ॥
स होवाच प्राणोस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वेति । तथोत्तरत्रापि अथ खलु प्राण एव प्रज्ञात्मेदं शरी
रं परिगृह्योत्थापयतीति । तथा न वाचं विजिज्ञासीत वक्तारं विद्यादिति । स एष प्राण एव प्रज्ञात्मानन्दोऽज

तोऽमृत इति किमत्र प्राणशब्देन वायुमात्रमभिधीयते किं देवतात्मा उत जीवोऽथवा परं ब्रह्मेति नानालिंगदर्श
ब्र॰ नात्संशयः किं तावद्युक्तं देवदेवतात्मेन्द्रः प्राणशब्दो भवेत् प्राणो हि बलं तस्य तेजो देवताभ्यधिकाच्चन हृतिरिन्
२५ कर्मेव तदिति अभियुक्तवचनात् मुख्यप्राणो वास्यात् अस्मिन्देह इति प्राणैः विधीयते ॥ प्राणः परमात्मा तथा
ब्रह्मप्रतिपादनपरत्वेन वाक्यानां समन्वयादुपक्रमे तावद्वरं वृणीष्वेति इन्द्रेणोक्तः प्रतर्दनः त्वमेव मे
वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इति हिततमं च ब्रह्मज्ञानादन्यन्नोपपद्यते । तं मामायुरमृतमुपा
स्वेति च ब्रह्मपरिग्रहे कल्पते । स एष प्राण एव प्रज्ञात्मानंदोऽजरोऽमृत इति चोपसंहारोऽवकल्पते । न वक्तु
रात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् इत्युपपत्तावभिप्रायः प्रदर्श्यते ॥ न वक्तुरिन्द्रस्यात्मोपदे
शात् किंतु तद्वाच्यदेवताविशेषः स्वमात्मानं प्रतर्दनायोवाच मामेव विजानीहि प्राणोऽस्मि प्रज्ञात्मेति निर्दि
ते च देवतात्मोपदेश उपक्रम एव शोकान्नोऽविरोधात् तदुपसंहारेऽन्यत्वात्कुतस्यादुपक्रमस्य हिततमत्वं तदनुपजात
विरोधित्वात्तथैव व्यवहीतत्वं । तद्विविरोधित्वादुपसंहारविज्ञानं तदन्योन्यावतिष्ठते । अन्यथा ह्येकवाक्यतानास्या
दिति प्राप्ते समाधानमुच्यते ॥ अध्यात्मसंबन्धभूमा ह्यस्मिन्नित्यात्मन्यधिकुप प्रविवर्तमानः संबंधोऽध्यात्म
संबंधः प्रत्यगात्मविषयसंबंधभूयस्त्वादिरूपः । अस्मिन्नध्याये यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायु
रिति प्राणस्यैव प्रज्ञात्मनः स्वातंत्र्यं दर्शयति । तथा प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति वाक्ये २५
विजिज्ञासीत वक्तारं विद्यादिति चोपक्रम्य तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः
प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्मानंदोऽजरोऽमृत इति सर्वाश्रयं नाभिभूत

परमात्मानमेवोपसंहरति स म आत्मेति विद्यादिति चोपसंहारमयमात्मा ब्रह्म सर्वानुभूरिति च श्रुत्यंतरं
तस्मादात्मविषयवाक्यभूयस्त्वान्न देवतात्मोपदेशः शक्यो विज्ञातुं कथं तर्हि वक्तुरात्मोपदेश उच्यते ॥ शास्त्रदृष्ट्या
तूपदेशो वामदेववत् । इन्द्रो देवताविशेषः स्वमात्मानं परमात्मत्वेनाहमेव परं ब्रह्मेत्यार्षेण दर्शनेन पश्यन्नु
पदिशति स्म मामेव विजानीहीति । यथा तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति । तस्मा
द्वक्तुरात्मोपदेशः परमात्मपरिग्रहेन विरुध्यते पुनः प्रत्यगतिष्टे तेयद्यपि देवतात्मोपदेशो न च वाक्यत्वात्तथा
विध्यान्न ब्रह्मोपदेशपरत्वमस्मिन्नध्याये प्रतिपत्तुं शक्यते इति तदेतत्त्वाघमुपन्यस्य निराकर्तुमाह जीव
मुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यात् न ब्रह्मप्रतिपत्तिपरे कतिनाप्यधिसुं शक्या कुतो जीवलि
ङ्गान्मुख्यप्राणलिङ्गाच्च जीवलिंगं तावन्न विजिज्ञासीत वक्तारं विद्यादिति मुख्यप्राणलिङ्गं अथ खलु प्रा
ण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति । तस्मान्न ब्रह्मवाक्यमिति चेन्नैतदेवं उपासात्रैविध्यादेवं सति त्रि
विधमुपासनं प्रसज्येत जीवोपासनं मुख्यप्राणोपासनं ब्रह्मोपासनं चेति तत्र चोपक्रमोपसंहारयोरेकार्थ
परत्वादेकमिदं वाक्यं निश्चितं ॥ कथं पुनरुपक्रमोपसंहारयोरेकार्थपरत्वं हिततमोपदेशादुपक्रमे
तं मामायुरमृतमित्युपास्वेत्यमृतशब्दात् स एष प्राण एव प्रज्ञात्मानंदोऽजरोऽमृत इत्युपक्रमोपसंहारो दृश्य
ते । तत्राध्यवसितानां वाक्यानां तत्परत्वे नान्वयोपपत्तेः नार्थान्तरत्वं वाक्यभेददोषप्रसङ्गात् जीवप्राण
लिङ्गयोश्च परमात्मपरत्वेन परिणेतुं शक्यत्वात् स्तावत्परमात्मा यत्र तत्र तथाविधश्रुतिः नप्राणेन

ब्र० २६

नापानेन मर्त्यो जीवति कश्चन । इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रिताविति । जीवलिंगमपि परिणेतुं
शक्यं न वाचं विजिज्ञासीत वक्तारं विद्यादिति वचनक्रियाहेतुभूतं परमात्मानमात्मत्वेन विद्यादित्यर्थः ।।
तथा च श्रुतिः ।। यद्वाचानभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इति येन वा नि
ऽन्द्रियं प्रवर्तते सर्वान्तरं तदेव ब्रह्म त्वं विद्धि नेदं दृश्यजातं शरीरेंद्रियविषयसंस्थं यदिदमुपासते प्रा
णिनः सेवत इत्यर्थः ।। एवं च सर्वकार्यकरणप्रत्याख्यानेनान्तर्यामित्वं सामान्यभूतं वेदितव्यमुक्त्वोप
संहरति न वाचं विजिज्ञासीत वक्तारं विद्यात् तद्यथा रथस्यारेषु नेमिरर्पिता एवमेवैता भूतमात्रा
इत्युक्त्वा स एष प्राण एव प्रज्ञात्मानन्दोऽजरोऽमृतो न साधुना कर्मणा भूयान्भवति नो एवासाधुना
कनीयानेष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म कारयति
तं यमधो निनीषत एष लोकाधिपतिः स म आत्मेति विद्यादित्यत्रापि ब्रह्मणि प्राणशब्दप्रवृत्तेरा
श्रितत्वात्सा एवं न्धनं हि सोम्य मन इति इ० श्रुत्युपपत्तेः ।। इतरे तु त्रिविधमुपासनमिह विपासन
मित्येतदुक्तं भवति प्राणधर्मेण जीवधर्मेण स्वधर्मेण तूपास्य इति । इति शारीरकमीमांसाभा
ष्ये भास्करजगवल्लभीते प्रथमाध्यायस्य प्रथमः पादः समाप्तः ।। १ ।। श्रुतिलिंगवाक्यप्रक २६
रणसंदिह्यमानवचनव्यक्तिषु वाक्येषु निर्णयार्थं द्वितीयतृतीयौ पादावारभ्येते ।। सर्वत्रप्रसिद्धोप
देशात् सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत ।। अथ खलु क्रतुमयः पुरुषो यथा क्रतु

रस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीर इत्यादि समाम्ना
यते ।। तत्र संशयः किमत्र मनोमयत्वादिधर्मैः शारीर उपास्यत्वेनोपदिश्यते किं वा ब्रह्मेति किं तावत्
प्राप्तं शारीर इति । कुतः तस्य हि मनोमयत्वादि लिङ्गान्यविरोधात् परस्य अप्राणो ह्यमनाः शुभ्र
इति मनःप्राणसम्बन्धाभावश्रुतेः ।। ननु च लिंगात् श्रुतिर्बलीयसी श्रूयते च ब्रह्मशब्दः सर्वमेवेदं खलु
ब्रह्म श्रुतिरन्यार्थपरा स्वविधिपरं हीदं वाक्यं कथं यस्मात्सर्वमिदं विकारजातं ब्रह्मैव तज्जत्वात्तल्लयत्वा
त्तदनत्वात्तदनत्वाच्च सर्वस्य चैकत्वेन न कश्चिद्रागद्वेषः प्रवर्तेरन् ।। अतः शान्त उपासीतेति स क्रतुं कुर्वीते
ति उपासनं विधीयते ।। अतो मनोमयत्वादिभिर्धर्मैर्विशिष्टस्य जीवस्य उपासनमत्र विधीयते ।। अणी
यस्त्व श्रुतिश्चैष म आत्मान्तर्हृदयेऽणीयान्व्रीहेर्वा यवाद्वेति जीवस्याराग्रमात्रस्यावकल्पते नापरमे
स्य ब्रह्मणः ।। ज्यायस्त्वं तु ब्रह्मणा वाक्यैकताया भवकल्पिष्यत इति प्राप्ते ब्रूमः । परं ब्रह्मात्रोपास्यं कुतः
सर्वत्र सर्वेषु वेदान्तेषु जगत्कारणस्य प्रसिद्धस्य ब्रह्मण उपदेशात् सर्वं खल्विदं ब्रह्मेति न त्वन्यार्थं ब्रह्मग्रह
णमित्युक्तं । सत्यं तथापि सन्निहितत्वात्तद्धेतुतया प्रकरणगतानामुत्तरेषां वाक्यानां प्रवृत्तः शान्त
त उपासीतेत्युक्ते किमुपासीतेत्यपेक्षा जायते । तत्रायं विधिरवतरति स क्रतुं कुर्वीत क्रतुः संकल्पः
समाधिरित्यर्थः ।। ब्रह्मोपासीतेति प्रकृतेन ब्रह्मपदेन निराकांक्षं वाक्यं संपद्यते ।। अस्य च सामान्य

विधेर्गुणविशेषविधानार्थमुक्तं वाक्यजातं जीवस्य पुनरुपक्रमे अनुपादानान्नोत्तरत्रानुवृत्तिरिति। नत
न॰ स्योपास्यत्वं मनोमयत्वं ब्रह्मण्युपपद्यते॥ मनसा विशुद्धेनोपलभ्यते अतो मनोमय उच्यते॥ प्राणप्रेरि
२९ तशरीरवृत्तित्वाद्ब्रह्म प्राणशरीर उच्यते॥ अप्राणोह्यमना इति केवलकारणविवक्षयेत्यविरोधः। विव
क्षितगुणोपपत्तेश्च॥ वक्तुमिष्टा गुणा विवक्षिताः सत्यसंकल्पादयः ते परस्मिन्ब्रह्मण्युपपद्यंते। कथं
पुनरदृष्टिमेवेदे वक्तुमिष्टा संभवति नायं दोषः॥ उपादेयत्वेनानुपादेयत्वेन च विवक्षितत्वमविवक्षि
तत्वं प्रचोच्यते॥ यदुपासनार्थमुपादीयते तद्विवक्षितमित्यतत्रोपालंभः॥ अनुपपत्तेस्तु न शारीरः।
तु शब्दोवधारणार्थो ब्रह्मैवोपास्यं न शारीरः कस्मात्तस्मिन्सत्यसंकल्पादीनामनुपपत्तेर्जीवविषयः पू
र्वपक्ष इति प्रदर्शनार्थं व्यतिरेककथनार्थं च सूत्रं॥ कर्मकर्तृव्यपदेशाच्च। इतश्च न शारीरो मनोमयो यस्मा
त्तस्य कर्तृत्वेनोपासकत्वेन व्यपदेशः। कर्मत्वेनोपास्यत्वेन प्राप्यत्वेन च ब्रह्म व्यपदिश्यते। एतमितः
प्रेत्याभिसंभवितास्मीति॥ एवं प्रकृतं मनोमयत्वादिगुणमात्मानमितः शरीरत्यागादूर्ध्वमभिसंभवि
ता प्राप्तास्मीति यस्यैवं निश्चिता बुद्धिः स प्राप्नोत्युपास्यकर्मत्वार्थः॥ शब्दविशेषात्॥ समानप्रकरणे वाजि
नां श्रुतिः॥ यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतंडुलो वा एवमयमंतरात्मन् हिरण्मयः पुरुष २९
इत्यंतरात्मन्निति सप्तम्यंतो जीववचनस्ततो यः प्रथमांतः शब्दविशेषः तयोश्च भेदादुपासको जीवो

नोपास्य। इति स्मृतेश्च ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति इति॥ तदेवं चतुर्भिर्भेदः प्रतिपादितो
न्यायोपपन्नश्च प्रत्यक्षानुमानागमसिद्धत्वाद्भेदश्च सिद्धो नान्योतोस्ति द्रष्टा तत्त्वमसीति॥ तदेतद्भेदत्ते
ददर्शनं लज्जाकाराणि प्रेतमरोचयमानाः केचिन्मायावादिनो वदंतीश्वरस्यैव संसारित्वं तदंशभूतो
जीवो नाम नास्त्यविद्याकल्पितो यद्यपि कृतभेदात् व्यवहारः संसारीति। तदेतदयुक्तं। नेश्वरस्य संसारि
त्वमविद्यायोगाद्विज्ञानमानंदं ब्रह्मेति निरतिशयानंदस्वरूपत्वात्स्वभावसिद्धविद्यारूपत्वाच्च। न त
स्याविद्यायोगः संभवति स च सर्वज्ञः सर्वशक्तिः स कस्मादात्मानं संसारिणं कुर्यात् यो हि परतंत्रः स
बंधनागारे प्रवेश्यते तस्मात्तदंशभूतस्य जीवस्याविद्याकामकर्मयोगात्संसारित्वं यथा चैतत्त
थोत्तरत्र निपुणं वक्ष्यामः॥ अर्भकौकस्त्वात्तद्व्यपदेशाच्चेति चेन्न निचाय्यत्वादेवं व्योमवच्च॥ अर्भक
मल्पमोको नीडमायतनं यस्यासावर्भकौकास्तस्य भावस्तत्त्वं ततः परिच्छिन्नायतनत्वादेष म आत्मा
न्तर्हृदय इति स्वशब्देन च व्यपदेशादणीयानिति। जीव एवोपास्यो न सर्वगतः परमात्मेति चेन्नैतदेवम
स्य परिमाणं हृदये निचाय्यत्वादेवं व्यपदिश्यते न सर्वगतनिरसार्थं। अणीयस्त्वं च सूक्ष्मत्वविवक्षया न
परिमाणतया ज्यायान्पृथिव्या इत्युत्तरश्रुतिविरोधात् यथा च सूचीपाशापेक्षया आकाशस्याल्पत्वं व्यपदि
श्यते तद्वत्॥ संभोगप्राप्तिरिति चेन्न वैशेष्यात्॥ सर्वहृदयसंबंधात्सुखदुःखाद्युपभोगप्राप्तिरिति चे
न्न वैशेष्यात् विशेषो हि जीवपरयोर्भवति। जीवस्य हि सुखदुःखभोगे कर्मनिमित्तं नेश्वरस्य अ

म०

पहत पाप्मादि गुणश्चासौ श्रूयते न च देशप्राप्तिमात्रेण तद्धर्मप्राप्तिर्न हि निर्जंतसोऽपि देशसंबंधाद्धृद
योगः ॥ तस्माज्जीवौ सैवोपयोगेन परस्येति सिद्धं अत्ता चराचरग्रहणात् ॥ कठवल्लीषु पठ्यते ॥ यस्य ब्र
२८ ह्म च क्षत्रं चोभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स इति इत्यत्र ग्रहणेन भोज्यं निर्दिश्यते
तस्य च भोक्ता भवितव्यमिति अत्ता प्रतीयते ॥ स किमग्निर्जीवः परमात्मेति संदेहे सति ॥ त्रयाणामिह
प्रकृतत्वादग्निरत्तेति तावत्प्राप्तं ॥ तस्य ब्रह्मक्षत्रादिदेहेन सामर्थ्यात् ॥ विज्ञानात्मा वास्यात्तस्य
भोक्तृत्वप्रसिद्धेः ॥ सिद्धांतस्तु अत्तेति न परो ऽनन्य इति प्रतिपद्यते ॥ एवं प्राप्ते ब्रूमः ॥ अत्ता पर एव
स्थावरजंगमग्रहणात् ॥ ननु नास्तीह तादृशः शब्दः तथापि सामर्थ्यादिदमवगम्यते ॥ मृत्युर्विनाशकं सन्नव्या
ऽऽसिरूपसेचनमभिप्रेतं ॥ कृत्स्नं चराचरजातं तस्योपसंहर्त्तरीश्वर एवात्तेत्युपपद्यते ॥ न च जी
वस्यैतत्सामर्थ्यं न चाग्नेरत एवोपसंहारे ॥ न चात्राग्निः साक्षात्प्रकृतोऽस्ति दिस्त्वेः प्रकृतत्वात् ॥ अन
श्नन्निति वक्तुं कर्म्मफलभोगप्रतिषेधः उपसेचनभूता सर्वप्राणिर्ब्रह्मक्षत्रयो ग्रहणं ननु नाद्यमात्रं मत्त्यनि
वृत्तौ वा बाधेयात् ॥ प्रकरणाच्च ॥ परस्यैतत्प्रकरणं न जायते म्रियते वा विपश्चिदिति प्रकृतत्वाद्दुर्विप
श्चितिः स च विधिरधिकार इति चात्मपर्यंतरं अतो लिंगप्रकरणाभ्यां पर एवेति स्थितं गुहां प्रविष्टावात्मा २८
नौ हि तद्दर्शनात् ॥ कठवल्लीष्वेवं पठ्यते ॥ ऋतं पिबंतौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे

छायातपौ ब्रह्मविदो वदंति पंचाग्नयो ये च त्रिणाचिकेता इति ॥ तत्र संदेहः किं बुद्धिजीवौ निर्दिष्टावुत
जीवपरमात्मानाविति किं तत्र युक्तं बुद्धिजीवौ गुहां प्रविष्टाविति विशेषणात् न सर्वगतस्य ब्रह्मणो
गुहाप्रवेशकल्पनं युक्तं ॥ शरीरं हृदयं वा गुहा सुकृतस्य लोक इति चांतःकरणजीवयोरुपपद्यते ॥
अंतःकरणस्थो हि जीवः कर्म्मफलोके फलमश्नन् पुरे सुभुक्तेन पर इति प्राप्ते ब्रूमः ॥ गुहां प्रविष्टा
वात्मानौ हि तद्दर्शनात् ॥ यस्माच्चेतनत्वात् समानस्वभावौ संख्याश्रवणे च समानजातीयप्रतिप
त्तिर्दृश्यते ॥ अस्य गौर्द्वितीयोऽन्वेष्टव्य इति गौरेव प्रतीयते नाश्वः ॥ यदुक्तं गुहाप्रवेशकल्पनमयुक्तमिति तन्न
कल्पनमयुक्तमिति न ॥ कल्प्यते तद्दर्शनात् प्रवेशोऽस्य श्रुत्यंतरे दर्शनाच्च ॥ यो वेद निहितं गुहां प्रविष्टं गुहा
हितं गह्वरेष्ठं पुराणमिति ॥ कथमत्र पानमिति चेन्नायं विरोधः छत्रिन्यायेनोपपत्तेः यदि वाऽवि
वक्षितमितरः पाययतीति तयोः पानकर्तृत्वं प्रमाणांतरसिद्धमनूद्यते ॥ छायातपवदन्योन्य
विलक्षणत्वान्न विरुध्यते ॥ छायातपाविति विशेषणं तु गंतृगंतव्यभेदेन विशेषणात् सोऽध्वनः पार
माप्नोति ॥ तद्विष्णोः परमं पदमिति द्वा सुपर्णेत्यत्राप्ययमेव न्यायः ॥ परप्रकरणे श्वेताश्वतराणामय
यं मंत्रः ॥ पश्चादनंतरश्च मंत्रे स्तावेवं दर्शयति ॥ समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति
मुह्यमानः ॥ जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इति ॥ तदेवं श्रुतिसूत्रकारैर्जी

२८· वपरयोर्नेदं दर्शयितः॥ केचित्तु श्रुत्यर्थमाचार्येति च रुष्टतः कत्वा मायामात्रं स्वकुमाकल्पयित्वा स्वदेव द
२५ र्शनं दर्शयतीति तन्न तत्रापि गत्या तु गतिको लोकोनलोकः पारमार्थिकः॥ यस्य लोकस्य मर्त्यं त्वं ना
शितं तान्यात्मजनमिति॥ अंतर उपपत्तेः॥ य एषोऽक्षिणि पुरुषो दृश्यते। एष आत्मेति होवाच एतद
मृतमभयमेतद्ब्रह्मेति छांदोग्ये श्रूयते। तत्र संदेहः किं छायात्मा ह्यक्षिस्थाने निर्दिश्यते उत जीवो अधिष्ठात्री
देवतादित्यो यद्वेश्वर इति किं तावत् प्रतिभाति छायात्मा तस्य दृश्यत्वप्रसिद्धेः॥ विज्ञानात्मनो वा
यं निर्देशः स हि रूपग्रहणार्थं चक्षुषि संनिहितो भवति देवता वा रश्मिभिरेषोऽस्मिन्प्रतिष्ठित इ
ति श्रुतेरात्मत्वामृतत्वादि च देवता जीवयोः कथंचिदुपपद्यते। अतो नेश्वर ग्रहणं च स्थानविशे
षनिर्देशादिति प्राप्ते ब्रूमः॥ पर एव चक्षुष्यंतरः पुरुष इहोपदिष्टः कस्मादात्मत्वामृतत्वाद्युपपत्ते
र्मुख्यया च वृत्त्या शब्दार्थः प्रथमं प्रतीयते स शब्दार्थो नेतरः॥ पौरुषेयो हि सः संयद्वामाद्युपपत्तेश्च
एतं संयद्वाम इत्याचक्षत एतं हि सर्वाणि वामान्यभिसंयंतीति एष उ एव वामनीः एष हि सर्वाणि
वामानि नयति॥ कथमाभानीत्यर्थः॥ एष उ एव भामनीरेष हि सर्वेषु लोकेषु भातीति॥ स्थानादिव्य
पदेशाच्च। कथं पुनः सर्वगतस्य स्थानव्यपदेश इत्युपासनार्थमिति ब्रूमः॥ यथा दहरं पुंडरी २७
कं आदित्ये चक्षुषीति पृथिव्यादिति च तत्र तत्र सन्निधानं दर्शयितुं स्थानादिग्रहणमुपासनार्थमामरू

पमयस्य निर्दिश्यते तस्योदिति नाम हिरण्यश्मश्रुरित्यादि च शब्दः समंजसो नान्यथा। सुखविशिष्टा
भिधानादेव च॥ सर्वत्र सुखविशिष्टाभिधानादेव च॥ सर्वत्र सुखविशिष्टस्य ब्रह्मणोऽभिधानांतरं देवप्रक
तमत्र परामृश्यते संयद्वामादिगुणविधानार्थमिति विधानार्थं च प्राणो ब्रह्म कं ब्रह्मेति तत्रसूत्रात्मा
समस्तजगद्विधयितात्र प्राण इति निर्दिश्यते॥ तद्विशिष्टं ब्रह्मोपास्यमित्यर्थः॥ कं ब्रह्मेत्यनेन सुख
विशिष्टत्वमुच्यते। कं खं शब्दश्चान्योन्यमवच्छेदेन तु ब्रह्मसंबंध्यार्थं तु नरू कंयदेव कं तदेव खं।
यदेव खं तदेव कमिति कंशब्देन सुखवाचिना काशे विशेषिते न लाकाशो निवर्त्तते। खंशब्दे
न चाकाशवाचिना सुखे विशेषिते सामान्यसुखवं निरस्तदेवं निरतिशयानंदगुणं ब्रह्म प्रा
णविशिष्टं चोपास्यमिति समुदायार्थः॥ च शब्दे हेतुसमुच्चयार्थो व धारणार्थ एवकारः॥ यथा पु
ष्करपलाश आपो न श्लिष्यंत एवमेवंविदि पापं कर्म न श्लिष्यत इतीयं श्रु तिरस्मत्र नावकल्प्यते
अत्रावसरे तएवत ब्रह्मेति सत्रमन्ये पठंति॥ तत्तु नर्गतार्थमिति अस्माभिर्नादृियते॥ श्रुतोप
निषत्कगत्यभिधानात् श्रुता उपनिषत् आस्न विद्यायेनासौ श्रुतोपनिषत्कः॥ उपनिषदिति वि
शीर्यन्ते संसारबीजानि यस्यां सा उपनिषत् विद्या मुख्यया वृत्त्या तत्संयोगाद्ग्रंथोऽप्युपनिषदु
च्यते तस्य ब्रह्मविदो या गतिर्देवयानाख्या प्रसिद्धा अथोत्तरेण तपसा ब्रह्मचर्येण श्रद्धयात्मान

भर०

३०

मन्विष्यादित्यमक्षिजुपपत्तेरितेदेवमात्मानावात्मायतनमेतदमृतमभयमेतत्परायणमेतस्मान्नपु
नरावर्त्तत इति सैषेहोपकोशलस्य श्रुतोपनिषत्कस्याभिधीयमाना दृश्यते ॥ ते । थिवमक्षिसंनिव
र्तीतितयाप्रसिद्ध्याप्रसिद्धनिर्देशोऽयमिति निश्चीयते अन्यथानुपपत्त्या । अनवस्थितेरसंभवाच्च
नेतरः ॥ नछायापुरुषः कस्मादनवस्थितेः । नह्यसौ चक्षुषा सदा स्थितो येनास्योपदेशः स्यात् ॥ पुरु
षान्तरसन्निधाने हि दृश्यते । नचतथावाक्यार्थः शक्यः कल्पयितुं यथाश्रुतोरुपपत्तेरसंभवाच्चा
त्मत्वामृतत्वादीनां अचेतनत्वाद्विज्ञानात्मदेवतयोरसंभवः ॥ नचामृतत्वमभयत्वं च जीव
स्योपपद्यते सर्वदा सांसारिकतया मृतत्वाद्देवतायाश्च भयमस्ति । तथा च भीषास्माद्वातः पवते भी
षोदेति सूर्यः ॥ भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति पंचमः इति मंत्रवर्णाद्विभेदिः ॥ सम्माहितत्वेतो निर्दि
श्यत इति ॥ एवं अन्तर्याम्यधिदैवादिलोकादिषु तद्धर्मव्यपदेशात् ॥ य इमं च लोकं परं च लो
कं सर्वाणि च भूतान्यन्तरो यमयतीत्युपक्रम्य श्रूयते यः पृथिव्यां तिष्ठन्पृथिव्या अन्तरो यं पृथिवी ३०
न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इति । तत्राधिदै
वतमधिलोकमधिदेवमधियज्ञं अधिभूतमध्यात्मं च कश्चिदन्तरवस्थितो यमयितान्तर्या
मीति व्यपदिश्यते ॥ तत्र संदेहः ॥ किं देवतात्माद्यभिमानी कश्चित् किंवा जीवः किंवा परमात्मेति । कि

न्तावद्युक्तं जीवः स्यात् स हि कार्यकरणसंघातमात्मीयं भोगाय अंतरवस्थितोनीति श्लिष्यते । नपर
मात्मा तस्याकार्यकरणत्वाद्देवताचाभिमानिनां नियंत्री स्यादिति प्राप्त उच्यते ॥ अंतर्यामी परएव
कुतस्तद्धर्मव्यपदेशात् तत्सर्वंत्रतयमयितृत्वं नामतस्य धर्मो नान्यस्यावकल्प्यते ॥ समस्तं हि विकारजा
तमनुप्रविश्य कारणत्वान्मृतादिवस्तुसर्वशक्तित्वाच्च नियमयितृत्वमुपपन्नमात्मत्वममृतत्वं च त
स्मिन्नेवमुख्यं ॥ अतः श्रुतिलिङ्गाभ्यामीश्वरोऽन्तर्यामीति निश्चीयते ॥ श्रुतिर्नामयत्रश्रवणादेवार्थो
वगम्यते । न निर्दिष्टान्तरात् सश्रुत्यर्थः ॥ श्रवणं श्रुतिः यत्र सामर्थ्यादर्थनिश्चयस्तल्लिङ्गं ॥ संहत्या
र्याभिधानं यदवानां पञ्चत्वावयं मुख्यया वृत्त्या गोपाजत्तता यावा प्रकरणं तु व्याख्यातं पुरस्तात् ॥ यं पृ
थिवी न वेदेति च देवतापरिग्रहे नोपपद्यते । सा हि स्वात्मानं विजानीयात् । एष त आत्मेति चातिरेकष्टं
जीवपरिग्रहेनोपपद्यते । यं नियमयत्यन्तर्यामीति ह्रीयमेव कार्यकरणमनुप्रविश्यावयमयति सर्व
शक्तित्वादिति नास्य कार्यकरणमपरमपेक्ष्यमाणं नवस्थात्मतद्धर्माभिलापात् । यद्यप्यदृष्टत्वा
दयो धर्माः प्रधानस्यापि संभाव्यते तथापि नस्मार्त्तम्प्रधानमिह नियन्तृपरिगृह्यते ॥ स्मृतिप्रतिप
न्नस्यातीकस्मादतद्धर्माभिलापात् ॥ तस्य धर्मास्तद्धर्माः न तद्धर्मो ऽतद्धर्माः तस्याभिलापाद्दन्निधा
नाच्चेतनधर्मोपदेशादित्यर्थः ॥ अदृष्टो द्रष्टा श्रुतः श्रोतेति ॥ इत्युक्ते नाशङ्क्य स्यत्र निरस्तम

ब्र॰ प्यदृष्टत्वादिधर्मसंभवादाशंक्य पुनर्निरस्यते यद्यचेतनं अंतर्यामिन संभवति माभूत् चेतनत्वात्तु जी
वः स्यात्तस्य हि द्रष्टा श्रोता चेत्यात्राक्तं निराकरणाय ह शारीरश्चोभयेपि हि भेदेनैनमधीयते इति द्रष्टृ
३१ त्वाश्रवशब्देनानुकृष्यते॥ न जीवोंतर्यामी तस्य पृथिव्यादिषु नियमसामर्थ्यं न संभाव्यते अत्र चैकस्ये
व सर्वविकारेषु नियंतृत्वं श्रूयते अपि चोभये काण्वा माध्यंदिनाश्च विज्ञानात्मनो भेदेनैनमंतर्यामि
नं अभिधीयते यो विज्ञाने तिष्ठन्निति काण्वाः य आत्मनि तिष्ठन्निति माध्यंदिनाः विज्ञानशब्देन च विज्ञा
नप्रधानो जीव एवोच्यते॥ अत्र केचिदाहुः ननु कथमेकस्मिन्देहे द्वौ द्रष्टारौ संभवतः इति को विरोधो
येनैवमुच्यत इति श्रुतिर्हि नान्योतोस्ति द्रष्टेति प्रवृत्ता अंतर्यामिणोन्यं वारयतीत्युच्यते॥ यथैवेयं न तद
भेदं दर्शयति तथा पूर्वमुदाहृतं॥ आत्मनीति भेदं दर्शयतीति किं न पश्यसि॥ नत्वस्याः श्रुतेर्वचनं मुख्य
गावचनमविद्याविद्वदणीयमन्यस्याप्यनादरणीयं प्रामाण्यस्य तुल्यत्वात् इतो भेदाभेदौ गृहीतव्यौ न च ता
त्पर्यकृतो विशेषोऽन्तर्यामिस्वरूपविज्ञानपरत्वात्प्रकरणस्य नियंत्रंतराशंकानिवृत्त्यर्थमपि शक्य
ते। वर्णयितुं नान्योतः सर्वस्य द्रष्टास्ति सर्वथायं पृथिव्यादिनवेदेत्यदेवतादिक्षेत्रज्ञानुपपन्नस्य लक्षणापो ३१
नयुज्यते अदृश्यत्वादिगुणको धर्मोक्तेः अथर्वणि श्रूयते अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्य
मग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भू

तयोनिं परिपश्यंति धीरा इति॥ तत्रेदं चिंत्यते किं प्रधानमदृश्यत्वादिगुणकमथ वा विज्ञानात्माऽथ पर
मात्मेति किं तावत्प्राप्तं प्रधानमिति पूर्वत्र द्रष्टृत्वादिगुणासंभवात्पर्युदस्तं इह त्वदृश्यत्वादिगुणसंभ
वादविरुद्धा युक्तेति॥ ननु जात्राधिय यः सर्वज्ञः सर्ववित् इति गुणांतरं न संभवति नायं दोषः॥ अक्षर
त्परतः परो यः स सर्वज्ञो भविष्यति अक्षरवाच्यं तु प्रधानमेवेति मन्यते पूर्वपक्षवादी जीवो वा भू
तयोनिः तस्य स्वकर्मार्जितत्वाद्भूतानां निमित्तभावोस्तीत्यविशिष्टोऽस्मिन्पक्षे निमित्तत्वेन नोपारंभे
योऽपि चाचेतनानां पृथिव्यादीनां दृष्टांतांतरेणोपादानात् चेतनं प्रधानं युक्ततरं गृहीतुं कर्णनाभिः श
रीरं च सत्वस्य योनिः श्लेष्मतनाधिष्ठितं न चेतनादेव सत्त्वं जायत इति चेतनस्य योनित्वं नास्तीति प्राप्ते
अभिधीयते॥ अदृश्यत्वादिगुणकः परो भवितुमर्हति॥ कुतो धर्मोक्तेः स्वादव्यभिचारी धर्म इहोच्यते॥ यः
सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः इत्युत्तरं च यथा सुदीप्तात्पावकाद्विस्फुलिंगाः सहस्रशः प्रभ
वंते सरूपास्तथाक्षराद्विविधाः सोम्य भावा इति प्रकृताद्भूतयोनेरक्षरादुत्पत्तिं दर्शयति॥ य
था सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्वमिति शेषश्चानश्चैवं स ब्रह्मवि
द्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहेति तदपेक्षयोत्तराणि वाक्यानि प्रवृत्तानि द्वे विद्ये वेदि
तव्ये इति चोक्त्वा अथ परा यया तदक्षरमधिगम्यत इति परत्वं च विद्यायाः परंब्रह्मप्राप्तिहेतुत्वा

भ॰
३२

र्शित्विं तदक्षरमित्यपेक्षायां यत्तदद्रेश्यमित्याद्याम्नातं ॥ तत्र कथमकस्मात्कूष्मांडपात्रवत् प्रधानं प्र
तीयते विशेषणभेदव्यपदेशाभ्यां च नेतरौ न जीवो न प्रधानं कस्माद्विशेषणात् ॥ दिव्यो ह्यमूर्त्तः पुरुषः
सबाह्याभ्यंतरो ह्यजः अप्राणो ह्यमनाः शुभ्र इति सशरणः समनाश्च जीवं प्रधानाद्भेदेन भूतयोनि
र्निर्द्दिश्यते परेणश्लोकपादेन अक्षरात्परतः पर इति सर्वस्मात् ॥ परो विकारोऽक्षरं भूतसूक्ष्मं यव्याकृ
ताकाशमिति प्रासिद्धं वेदांतवादिनां तादृशादक्षरात्प्रधानशब्दवाच्यात्स्वविकारेभ्यः परात्परो भू
तयोनिः सर्वज्ञः सर्ववित् इति भेदेनव्यपदिश्यते ॥ अत्र च भूतयोनो भूतसूक्ष्मे वाक्षरशब्दः प्रयुक्तः तत्र
व्युत्पत्तिभेदाद्धर्म्मभेदेन क्षरतिकस्मिन्नले ॥ अक्षरं भूतयोनिः अश्नुते व्याप्नोति स्वविकारानित्यक्षरं
भूतसूक्ष्मं रूपोपन्यासाच्च ॥ योयं भूतयोनिः कारणात्मा एव कार्य्यात्मनावस्थित इति दर्शयितुं रू
पमुपन्यस्यते अग्निर्मूर्द्धा चक्षुषी चंद्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः ॥ वायुः प्राणो हृदयं वि
श्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतांतरात्मेति हिरण्यगर्भस्यैतद्रूपमिति केचिद्वदंति तदयुक्तं प्रकरण
विरोधात् ॥ प्रकरणिनि परमकारणे चेदीदृग्रूपं नोपपद्यते तर्ह्युत्पन्नस्य चायं ताप्रसुतप्रस्तुत हिर ३२
ण्यगर्भस्यापीदृग्रूपं परमात्मद्वारेणोपपद्यते वान्यथेति स्थितं वैश्वानरः साधारणशब्दविशे
षात् ॥ कोन आत्मा किं ब्रह्मेति आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीति चोपक्रम्य

द्युसूर्यवाय्वाकाशजलपृथिवीनां सुतेजस्त्वादिगुणयोगमेकैकोपासननिंदया च द्युमूर्द्धादिभावयु
पदिश्याम्नायते यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु स
र्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्तीति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः
पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हप
त्यो मनोन्वाहार्य्यपचन आस्यमाहवनीय इति ॥ तत्र संदिह्यते किमुदरस्थोऽग्निरुपदिश्यते किं वा भू
ताग्निस्तदभिमानिनी वा देवता शरीरी वा परमेश्वर इति किं पुनरत्रयुक्तं जाठरोग्निः ॥ तत्र वैश्वानर
शब्दप्रसिद्धेरयमग्निर्वैश्वानरो योयमंतः पुरुषे येनेदमन्नं पच्यत इति प्रयोगात् ॥ भूताग्निर्वा साम
न्येनापि लोके वैश्वानरशब्दप्रदर्शनात् ॥ अग्निमानीनि वा देवता वैश्वानरं केतुमह्नामकृण्वन्निति
ति वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीरिति च ब्रह्मात्मशब्दौ च गुणवृत्त्या यो
जनीयौ यद्दिवा वरुणाद्युल आमो तेरात्मेति च सत्वात्कथंचिद्धेतस्य योजनीयं ॥ वैश्वानरणब्रह्म
तत्रगोण स्त्रद्युपकादित्वाद्दुरराग्निका जीवस्योपकारः प्रसक्तो निवर्त्तितेन परमात्मन इति ॥ क
श्चित्तु नरात्मशब्दानुरोधात् हृद शारीरमेव पूर्वपक्षयति ॥ अत्र वैश्वानरशब्दानुपपत्तिः सिद्धांते
चाग्नेर्निराकरणमनुपपन्नं स्यादेवं प्राप्ते अभिधीयते ॥ वैश्वानरः परमात्मा कुतः साधारणशब्दवि

भ० शेषात्साधारणशब्दयोरात्मवैश्वानरशब्दयोर्विशेषाश्रयणं साधारणे वैश्वानरशब्दो द्व
योरात्मशब्दो जीवपरयोः तथापीहयेन पर एवावगम्यते स विशेषो विद्यते मूर्द्धैव सुतेजा इत्या
३३ दिविशेषः परमेश्वरस्योपपद्यते तद्विकारत्वात् परमकारणस्य हि द्युप्रभृतयः पृथिवीपर्य्यं
ताः अवयवव्यपदेशाः कल्प्यंते नान्यस्य। को न आत्मा किं ब्रह्मेति चोपक्रमः परमात्मपरिग्रहे
वकल्प्यते बलवच्चोपक्रमे यद्विज्ञानमनुपसंजातविरोधित्वात्॥ तदुत्तरकालीनं तद्विरोधित्वा
त्तद्वचो नैवोपतिष्ठते। तथा चोपसंहार एवं हास्य सर्वे पाप्मानः प्रदूयंत इति सर्वपाप्मप्रदाहश्च प
रमात्मपरिग्रहेवकल्प्यते स्मर्य्यमाणमनुमानं स्यादिति। इत्थं पर एवेति शब्दो हेत्वर्थः॥ स्म
र्य्यमाणरूपमनुमानं अनुमीयते श्रुतिर्येन तदनुमानं किं पुनारूपस्मरणं द्योर्मूर्द्धानं यस्य विप्रा व
दन्ति खं वै नाभिं चंद्रसूर्य्यौ च नेत्रे दिशः श्रोत्रे दिवि पादौ क्षितिश्च सोऽचिन्त्योऽन्तं प्रविष्टानान्ने
ति चेन्न तथा दृष्ट्युपदेशादयं विरोधस्तथा तेन प्रकारेण जाठरवैश्वानरगुणविशिष्टस्य परस्यो
पासनोपदेशात्॥ यथा रवाथेष्टिरुक्त विद्यायां प्राणशरीरो भारूप इ॥ इति कस्मादेवं व्याख्यायते ३३
असंभवात् परमेश्वरात्मापर्णोर्धं द्युलोकावयवस्यासंभवं स्यात्॥ न हि विकारस्य विकारां
तरमवयवो भवति सम्बन्धहेतुत्वाभावात् परमकारणस्य तु उत्पादकत्वात्तदात्मतावस्था

नादस्ति तादात्म्यलक्षणः संबन्धः॥ अपि चैनं पुरुषविधमधीयते वाजसनेयिनः स एषोग्निर्वै
श्वानरो यत्पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेन्तःप्रतिष्ठितं वेदेतीश्वरस्य पुरुष
त्वं पुरुषविधत्वं च मूर्द्धैव सुतेजा इति श्रुतिकल्पितं सर्वात्मत्वादुपपद्यते। केवलस्यौदर्याग्निप
रिग्रहे पुरुषेन्तःप्रतिष्ठितत्वं स्यात्। न पुरुषविधत्वं अत एव न देवताभूतं च अत एवोक्तेभ्यो हेतुभ्यो
न देवता न भूताग्निः प्रतीयते। साक्षादप्यविरोधं जैमिनिः नायं वैश्वानरशब्दो जाठराग्न्यभि
प्रायेण प्रयुक्तो यदनुरोधात्तदुपाधिकस्येश्वरस्योपासनं कल्प्येत यौगिकोयं शब्दोत्र। विश्वानरान्न
यतीति वैश्वानरः स्वार्थे तद्धितः राक्षसवायसादिवत् आनिसुरस्येन विचित्रं जगन्निर्मिमीते अ
निगतश्वासो विगतमानश्चेति वा निमानो वैश्वानरशब्दस्य यौगिकेर्थे सति जाठरानलविशि
ष्टात्मोपासनमनभिप्रेतं बादरायणस्यापि॥ छांदोग्यश्रुते रयमत्र समुदायार्थो अधिदैवतं यो
सौ पुरुषविग्रहः परमात्मा द्युप्रभृतिभिरवयवैः प्रविभक्तो दर्शितस्तस्मिन् स्वावयवानध्या
न्यथाक्रमं संपाद्याहं वैश्वानरः परमात्मास्मीत्युपासीतेति॥ उक्तं चैतदग्निरहस्ये वैश्वानरविद्या
यामध्यात्ममुपासनं अत्राधिदैवतमभिति भिन्नप्रस्थानत्वात् श्रुते न चेतरानुरोधेनान्यतरबा
धः कल्प्यः॥ यद्यपि प्रत्यभिज्ञानं तथाप्युपासनाप्रकारभेदादेवस्येति॥ गार्हपत्यादिकल्पन।

ब्र॰ मा ऊति पर्यंतं वैश्वानरविद्यां गत्वेनोपदिष्टमित्यर्थः अभिव्यक्तेरित्याश्मरथ्यः ॥ प्रादेशमात्रश्रुतिं व्या
चष्टे दृष्टेर्वैषामुपासकानामनुग्रहायानंतस्यापीश्वरस्य प्रादेशमात्रमभिव्यज्यतइत्याश्मरथ्यो मन्यते ॥
३४ अथवाद्युलोकादिषु प्रदेशेष्वभीयते परिच्छिद्यतइति प्रादेशमात्रं ॥ अनुस्मृतेर्बादरिः प्रादेशमात्रेण हृ
दयेनानुस्मरणं प्रादेशमात्रइत्युच्यतइति बादरिर्मन्यते संपत्तेरिति जैमिनिस्तथाहि दर्शयति ॥
बादरायणस्याभिप्रायो व्याख्यातः आधिदैवतं व्याप्यावस्थितस्योपासनमिति ॥ जैमिनेराचार्यस्याभि
प्रायोऽधुना वर्ण्यते ॥ संपत्तिनिमित्ता प्रादेशश्रुतिरिति जैमिनिराचार्यो ददर्श ॥ किंच कुत्रानेत्युच्यते ॥ त
थाहि दर्शयति ॥ समानप्रकरणे वाजसनेयिब्राह्मणे द्युलोकप्रभृतीनवयवान् यथाक्रमं मूर्धप्रभृति चि
बुकपर्यंतेष्वध्यात्मावयवेषु संपादयति ॥ सहोवाच मूर्धानमुपदिशन्नुवाच ॥ एष अतिष्ठा वैश्वानर
इति चक्षुषी उपदिशन्नुवाच एषवैसुतेजा वैश्वानरइति नासिके उपदिशन्नुवाच एषवै पृथग्वर्त्मा वै
श्वानरइति मुख्यमाकाशमुपदिशन्नुवाच एषवैबहुलो वैश्वानरइति मुख्या अप उपदिशन्नुवाच ॥
एषवै रयिर्वैश्वानरइति ॥ चिबुकमुपदिशन्नुवाचैषवै प्रतिष्ठा वैश्वानरइति ॥ चिबुकमधरं मुखफ
लमुच्यते ॥ वाजसनेयके घौरतिष्ठागुणा दिवश्चक्षुस्तु तेजस्त्वगुणः ॥ छांदोग्येतु द्यौः सुतेजस्त्वगुणा ३४
दित्यश्च विश्वरूपगुणइति भका चोभिद्यतेचायमग्निसंबंधित्वेन तत्र वैश्वानरशब्दः प्रयुक्तो नच

छांदोग्यवत् ॥ कोन आत्मा किंब्रह्मेति ब्रह्मोपक्रमोस्ति तस्मात् द्विधा भेदः यद्येवं कथं पुरुषविधं पुरुषें
तः प्रतिष्ठितं वेदेति वचनमत आह ॥ आमनंति चैनमस्मिन् ॥ एवं विधमग्निमस्मिन्देहे संपाद्यमानं पुरु
षविधं पुरुषेंतः प्रतिष्ठितमिति च समामनंति वाजसनेयिनः चिबुकमुपदिशन्नित्युक्त्वाऽनंतरमेतदा
म्नते ॥ अंतःशब्दश्चास्य विजातीयापेक्षया प्रथमस्याध्यायस्य द्वितीयः पादः समाप्तः ॥ द्युभ्वाद्यायतनं
स्वशब्दात् ॥ यस्मिन्द्यौः पृथिवी चांतरीक्षमोतं मनः सह प्राणैश्च सर्वैस्तमेवैकं जानथ आत्मानमन्या वाचो
विमुंचथामृतस्यैष सेतुरिति श्रूयते ॥ अत्र संदेहो यदेतत् द्युप्रभृतीनां समस्तमायतनं निर्दिष्टं कि
तत्परं ब्रह्मस्यादाहोस्विदर्थांतरमिति किं तावत्प्राप्तं प्रधानमायतनं स्वविकारस्य हि कारणमाश्रयः
कस्मादेवं सेतुश्रुतेः पारवान्हि सेतुरुपगतो लोकेन ब्रह्मणः पारवत्त्वमपारमिति श्रवणात् ॥ आत्म
शब्दश्चैवं तदुपकारित्वात् प्रधानविषयः प्रयुक्त इति व्याख्येयं ॥ यद्वात्मश्रुतेः सेतुश्रुतेश्च जीवो
वा स्यादितरस्य तस्यायायतनत्वमुपपद्यते ॥ कर्मनिमित्तत्वात् द्युलोकाद्युपपत्तेः सिद्धांते पूर्वपक्षत्र
कारेण निराकरोति स एव सर्वत्र पूर्वपक्षो प्रदर्शनीयो नयः कश्चित्स्वमनीषिकया ॥ अत्रोच्यते परं ब्रह्म
द्युभ्वाद्यायतनं द्यौश्च भूश्च तौ द्युभुवौ द्युभुवावादी यस्य तदिदं द्युभ्वादि तस्यायतनं आयतनशब्दो नपुंसक
लिंगः तत्र द्युभ्वाद्यायतनमिति पाठः ॥ कुतः कस्मात् स्वशब्दात् आत्मशब्दात् तमेवैकमिति विकारजा

तंतस्मिन्नेवचेतनसोपसंहृत्यतमेवकारणात्मानंजानथोपासीतेत्यर्थः।।सर्वत्र॰हिविहितोप
न० क्रम्योपासिनोपसंहरत्सुपासिनाचोपक्रम्यविहितोपसंहरतिश्रुतिरतोयत्रान्यतरोपादानंत
३५ देकार्थतैवप्रत्युमुच्यावेक्षणःप्रपंचवहिरंतर्बुद्धेश्चैतन्यमात्रंध्येयमुपदिशंति।तेचासर्वेतंप
राद्दितिम्भ्रूतिविरोधः।सेतुश्रुतिष्वात्मतत्वावधारणान्माच्चिवत्सपातदधीनप्रमतत्त्वमित्यर्थः।।
नपारवत्वविवक्षयेति।सर्वथासेतुसाम्यं।।कश्चिद्दाहालसज्ञानंसेतुश्रुत्यानिर्दिष्टमिति।तदयु
क्तंएषइत्यनंतस्यप्रजानस्यवाचकंसर्वैनामप्रोपसर्जनस्येतिमुक्तोपसृप्यव्यपदेशात्।इतश्च
परमतीतिरागद्वेषादिदोषमुक्तैर्विद्वद्भिरुपसृप्यंगन्तव्यमायतनंनिर्दिश्यते।।तथाहिनाम्ना
स्वरूपाद्विमुक्तःपरात्परंपुरुषमुपैतिदिव्यमिति।।नानुमानमतच्छब्दात्।।अनुमीयतइत्य
नुमानंप्रधानं।।तद्वाचकशब्दाभावादितरस्यचेतनस्यास्तिथः।।सर्वज्ञःसर्वविदितिभवतुत
र्हिशारीरस्तस्यपर्य्यायेणसर्वज्ञत्वोपपत्तेरात्मत्वस्यचलभतआह।।प्राणभृच्च।।नमुख्यय
त्वास्यसर्वज्ञत्वंतस्यावकल्प्यते।।नचपर्य्यायवाचीशब्दोऽत्रप्रयुक्तःदर्पयोगकरणमुत्तरा ३५
र्थं।।भेदव्यपदेशात्।।तमेवैकंजानथेतिज्ञातृज्ञेयतयाभेदव्यपदेशात्प्रकरणात्।।परप्रकरणंचेदं।
उपक्रमेदृष्टत्वात्।।कस्मिन्नुभगवोविज्ञातेसर्वमिदंविज्ञातंभवतीतिप्रकरणेचजातेयु

णक्रियाशब्दाःप्रयुज्यमानाःसन्निहितार्थविषयाएवेत्यात्मैवाध्यधिकरणेस्थितं।स्थित्यदनाभ्यां
च।।इतश्चनप्राणभृत्।द्वासुपर्णेतिभुक्तात्मनोःकर्मफलभोजनादत्तीतिव्यपदिश्यते।।अनश्नन्नन्यो
दाहीत्येनस्थितिरभिचाकशीतिदीप्यतइत्यर्थोऽत्रापिसत्राकारोजीवपरयोर्भेदमुपगम्यजीव
निराकरणंचकारश्चपरेतुस्वानुभवमुष्यपक्कवानात्मेदंमायामात्रंसंगिरंतेभूतयोनिवाक्येनि
राकृतमपिप्रधानंसेतुश्रुत्यापुनराशंक्यनिरस्तमित्यपौनरुक्त्यं।।भूमासंप्रसादादध्युपदे
शात्।इदमाम्नायतेभूमात्वेवविजिज्ञासितव्यइतिभूमानंभगवोविजिज्ञासइतियत्रनान्यत्पश्य
तिनान्यच्छृणोतिनान्यद्विजानातिसभूमाथयत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानातितदल्प
मिति।।तत्रसंशयःकिंप्राणोभूमाकिंवापरइतिकिंतावद्युक्तंभूमेतिबहुत्वंवैपुल्यमुच्यते।।त
त्कस्येत्यपेक्षायांप्राणोवाआशायाभूयानितिप्रकरणात्प्राणोभूमेतिगम्यते।किंचपुनःप्रश्न
प्रतिवचनाभावात्।।यथाअस्तिभगवोनाम्नोभूयइतिवाग्वावनाम्नोभूयसीतिनतथाऽस्ति
भगवःप्राणाद्भूयइति।श्रुतिवादित्वंप्राणोपासकस्योक्त्वासत्यादिपरंपरयाभूम्नोवक्ता
रात्प्राणस्यैवायंगुणोनपरस्येतिनिश्चीयते।कथंपुनःप्राणपरिग्रहेयत्रनान्यत्पश्यतीत्येतद्वचनं
नायंविरोधः।सुषुप्तावस्थायांप्राणग्रस्तेषुकरणेषुदर्शनादिव्यवहारनिवृत्तेः।।योवैभूमात

सुखमित्युत्पत्त्या विरुद्धं ॥ अत्रैष पूर्वपक्षः स्वप्नेऽत्रान्यत्पश्यत्यथैतस्मिन्नशरीरे सुखमनुभवतीति ॥ ननु च
मद. तरति शोकमात्मविदित्यात्मज्ञानविवक्षायामुपक्रमणस्यान्तं प्राणपर्यन्ते नावकल्पते । तथाऽऽत्मतः प्राण आ
३६ त्मत आशेत्युपसंहारः । एवं मन्यते पूर्वपक्षवादी भूमपर्यन्तता प्राणविधेर्वातः परमात्मविद्यानविरुध्यतीत्ये
वं प्राप्तेऽभिधीयते । परमात्मैव भूमा कुतः संप्रसादादध्युपदेशात् संप्रसादोऽस्मिन् जीव इति सुषुप्तस्था
नमुच्यते ॥ तेन च प्राणो लक्ष्यते । तत्र च प्राणो जागर्तीति प्राणग्रहणादुपरि एवदुपदिश्यमानत्वाद्भूम्न इत्यर्थः ॥
ननु च सिद्धो हेतुरत्रोच्यते । नासिद्धः कथं एष तु वा अतिवदति यः सत्येनातिवदतीति न प्राणवादि इति वा
दिति वादी स्यव च्छेदाय तु शब्दः यः सत्यरूपं ब्रह्मविषयं वदनं करोति सोऽतीत्य प्राणपर्यन्तं प्रपंचं वदतीति
कुर्वंतस्यापि वादित्वमिति सत्यं ज्ञानमनंतमिति सत्यशब्दः परमात्माभिधायी सोऽहं भगवः सत्येनातिव
दानीति च प्राणातिवादिन्येव परित्यागेन सत्यवदनानुज्ञानं प्राणप्रकरणविच्छेदं ज्ञापयत्यतो विज्ञानादिसाध
न परंपरया तस्यैव सत्यस्य भूम्न उपदेश इति निश्चितम् ॥ अथात्मतः प्राण आत्मत आश इति प्रा
णस्याप्युत्पत्तिमात्मनो दर्शयतीति तरति शोकमात्मविदिति तस्यैव दिवकथा यापत मसस्यारं दर्शयति ३६
भगवान्सनत्कुमार इत्युपक्रमोपसंहारयोरैकविषयत्वात्सर्वप्रकरणं सर्वमप्यात्मपर्यंतं
प्रासंगिकत्वात्तानि नावान्तराणि तत्त्वं नोपपद्यते धर्मोपपत्तेश्च यत्र नान्यत्पश्यति यत्र भूमि

सुखे वर्त्तमानो नान्यत् दुःखं न पश्यतीत्यर्थोऽन्यशब्दः प्रकृतात् सुखादन्यत्प्रतियोगि दुःखमाह न पुनर्वु
स्त्वंतराणां वेदनविवक्षितो न च निःसंबोधो मोक्षो भूमसुखस्य मुक्तं प्रतिश्रुत्यैव दर्शितत्वादमतत्वं
च परस्मिन्नेवावकल्पते ॥ तथा चाह न पश्यो मृत्युं पश्यति न रोगं नोत दुःखितां सर्वं हि पश्यः पश्यति
सर्वमाप्नोति सर्वश इति तस्माद्भूमा परमात्मेति सिद्धं । अक्षरमंबरांतधृतेः कस्मिन्नु खल्वाकाश ओ
तश्च प्रोतश्चेति स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमलोहि
तमस्नेहमच्छायमिति श्रूयते । तत्रायमर्थः सांशयिकः किमक्षरशब्देन प्रधानमुच्यते किं वा ब्रह्मेति ॥
किं तावत्प्राप्तं प्रधानं वक्तुं युक्तं । तस्य सर्वविकारधारणोपपत्तेरोतप्रोतत्वमुच्यते । अस्थूलादि च तस्मि
न्नुपपद्यते रूपादिहीनत्वाभ्युपगमात् । केचिदक्षरशब्दस्य वर्णे प्रसिद्धत्वादक्षरमोंकार इति पूर्वपक्ष
यंति । वैयाकरणदर्शने च स्फोटः शब्द इत्यवतारिते गकाराद्ययोर्वै वर्णा एव शब्दा इति स्थस्यापयंतित
देतदधिकरणे नास्मं बंधमलो हितमच्छायमित्येवमादिप्रतिषेधानुपपत्तेः ॥ प्रधानस्य तु युज्यते विका
रधर्माणां कारणे प्रसक्तेः कार्यकारणयोश्चानन्यत्वाभ्युपगमात् सांख्यानां । किंच वृत्तिकारेण मी
मांसायामप्युपयोगेऽपि त्वत्र कः शब्द इति स्फोटनिराकरणं कृतं न सूत्रकारेण । अत्रापि यद्यपि वक्तव्यं
वृत्तिकारेणोक्तं तां न सूत्रकारस्योपदिष्टं तदक्षरो यः कर्तव्यो पत्र वेद वाक्ये संदेहो जायते तन्निरा ३६

भट. करणेऽसूत्रकारप्रवृत्तिः ॥ प्रथमतंत्रसिद्धत्वाच्च स्फोटनिराकरणं निष्फलं स्याद्यत्र विप्रतिपत्ति
स्तन्निराकरणं ॥ धृत्युक्तेर्वक्तुं नान्यत्रेति प्रधानमोक्षरमिति प्राप्ते अमोक्षरं ब्रह्म कस्मादंबरांतधृ
३७ तेः आकाशपर्यंतस्य धारणात् ॥ ननूक्तं प्रधानेऽप्युपपद्यत इति तत्रोत्तरं पठति सा च प्रशासनात् सा च धृ
तिः परस्यैव कुतः प्रशासनात् एतस्य वाक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इति ॥
प्रशासनमाज्ञापयितृत्वं चेतनधर्म्मः अन्यभावव्यावृत्तेश्च यद्यपि प्रशासनं प्रधाने पि कथंचित्संभाव्ये
तः तथापि तत्र तस्याग्रहणं नास्ति ॥ कथमन्यस्य भावस्य प्रधानस्य व्यावृत्तिः श्रुतेस्तद्वा एतदक्षरं गा
र्ग्यदृष्टं द्रष्टृ अश्रुतं श्रोत्र अमतं मंतृ अविज्ञातं विज्ञातृ इति नान्यदतोऽस्ति द्रष्टृ इति तस्मात्परमेवा
क्षरं स्थितं ॥ ईक्षतिकर्म्मव्यपदेशात्सः एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्माद्विद्वानेते
नैवायतनेनैकतरमन्वेतीति प्रस्तुत्य श्रूयते यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुष
मभिध्यायीतेति ॥ तत्र संदेहः किमपरं ब्रह्म ध्यातव्यं किं वा परमित्युभयोः प्रकृतत्वात् स सामभिरुन्नी
यते ब्रह्मलोकमिति लोकश्रुतेरपरं ब्रह्मेति पूर्वः पक्षः कथं परं पुरुषमिति विशेषणं ॥ पुरुषांतरापेक्ष
याऽवान्तरं भविष्यतीति प्राप्ते प्रतिविधीयते ॥ स एव परमात्माभिध्येयः यईक्षतिकर्म्मत्वेन व्यपदिष्टः स ३७
एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत इति परपुरुषशब्दाभ्यां प्रत्यभिज्ञायमानस्य

चेक्षणं यो ध्यायति परं पुरुषं स तमेव पश्यतीति परमिति च श्रुत्या विशेषणात् प्रकृतबुद्धिरपरवि
षया बाध्यते ॥ यत्तच्छांतमजरममृतमभयं परं चेति उपसंहारात् परशब्दः परमात्मपरो निश्ची
यते ॥ परस्य च प्रकृतत्वात् अपरग्रहणं चैकैकमात्रोपासनापेक्षं स्वं ॥ जीवघनादिति कोऽर्थः त
दुच्यते घनो मूर्त्तिः स्वविद्याकर्मस्यां मूर्त्तिभावमापन्नो जीवः शरीरेंद्रियेभ्यश्च परस्तस्मात् एवाका
प्य ब्रह्मलोको हिरण्यगर्भनिवासो लोकानां परो लोकः करपरीवृत्तानां तत्र घनभावोपपत्तेः ततः
परात्परमात्मा स सामभिरुन्नीयते ब्रह्मलोकमिति ब्रह्मैव लोक इत्यास्थेयं न हि सगुणनिर्गुण
कृतो भेदोऽस्त्यालीवक्ष्यमाणः दहर उत्तरेभ्यः अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोऽस्मि
न्नंतराकाशस्तस्मिन् यदंतस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति श्रूयते ॥ दहरोऽस्मिन्नंतराकाश
इत्यत्र संदेहः किं भूताकाशः किं वा जीवोऽथ पर एवेति भूताकाश इति प्राप्तं ॥ प्रसिद्धेः ॥ ननु च यावान्वा
अयमाकाशस्तावानेषोंतर्हृदय आकाश इत्येकस्यैवोपमानोपमेयभावो नोपपद्यते ॥ नायं वि
रोधो बाह्याभ्यंतरकल्पितभेदेनाभेदेऽप्युपपत्तेः जीवो वा स्यात् निवासित्वाद्दहरश्रुत्युपपत्तेश्च ॥ दहर
मल्पं आराग्रमात्रश्च जीवः तथा हि श्रुतिराराग्रमात्रो ह्यवरोऽपि दृष्ट इति प्राप्ते विधीयते ॥ पर ए
व दहराकाशः कस्मादुत्तरेभ्यो वाक्यशेषगतेभ्यो यावान्वा अयमाकाश इति प्रसिद्धेनाकाशेनोप

ब्र॰ मीयते। दहराकाशः। भिन्नयोश्चोपमानोपमेयभावो लोके गम्यते। यवत्। नैकस्यैकस्मिन्नुपपत्तिरागम
संगात्। उभे अस्मिन्द्यावापृथिवी अंतरेव समाहिते इति समस्ताधिकाराधारत्वं परब्रह्मकारणस्यैवोपप
३८ द्यते। एष आत्माऽपहतपाप्मा विजर इत्यात्मत्वादिरपहतपाप्मत्वादिश्च तदन्यत्र नावकल्प्यते। अत एव जी
वोपि न गृह्यते॥ दहरत्वं पुनः पुंडरीकदहरत्वेनौपाधिकमिति विवक्षितमेव चोपमोपादानं गतिश
ब्दाभ्यां तथा हि दृष्टं लिंगं च॥ उत्तरे हेतुत्वं वः सामान्योक्ता प्रपंच्यते॥ एवमेवेमाः सर्वाः प्रजाः अहरह
र्गच्छंत्य एतं ब्रह्मलोकं न विन्दंतीति प्रजानां गतिः यत्रैव ब्रह्मलोकशब्दाभ्यां दहराकाशं ब्रह्म प्रतिपद्या
महे॥ तथा हि दृष्टं सता सोम्य तदा संपन्नो भवतीति तेषामेवैष ब्रह्मलोक इति वाक्यशेषो लिंगं अ
पवाल्लिंगं सामर्थ्यं ब्रह्मैव लोक इति विशेषणसमासपरिग्रहे॥ न हि प्रजानामहरहर्ब्रह्मलोके चतु
र्मुखस्य लोकगमनं संभवति। धृतेश्च महिम्नोस्यास्मिन्नुपलब्धेः धृतेश्च हेतोः पर एवायमयमा
त्मा स सेतुर्विधृतिरेषां लोकानामसंभेदायेति विधृतिर्विधारयितेत्यर्थः॥ कर्त्तरि व्युत्पत्तेरध्यात्माधि ३८
देवेषु भिन्नानां लोकानां विधारयिता असंभेदाय संकराय विधारणं परमात्मनो हि विधृता लोकानस्फु
टते॥ अस्य च महिम्नोपि धृते॥ एतस्मिन्नीश्वरेऽप्यत्रोपलब्धेरेतस्यैवाक्षरस्यैव जीवस्यावाकाशेन प
रामर्शात्स्यु एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत ए
प्रशासने गार्गीति प्रसिद्धेश्च परस्मिन्नप्याकाशशब्दप्रसिद्धेः आकाशो वै नामनामरूपयोर्निर्वहिता इति इतरपरामर्शात्स इति
चेन्नासंभवात्॥ इतरस्य

ष आत्मेति होवाचेति॥ स एवोपक्रमे दहराकाश इति चेन्न क्रमसंभवाद् अपहतपाप्मादीनां गुणानां तस्मिन्न
संभवात्॥ उत्तराच्चेदाविर्भूतस्वरूपस्तु॥ उत्तरात्प्रजापतिवाक्याद्य आत्मापहतपाप्मेत्युपक्रम्य य एषोऽक्षि
णि पुरुषो दृश्यत एष आत्मेति जीवः प्रतीयते। स एवोपक्रमेऽपि दहराकाशः स्यात्पोत्तरत्राप्यनुकर्षणं भव
त्येवं तं त्वेव ते भूयोऽनुव्याख्यास्यामीति। य एष स्वप्ने महीयमानश्चरत्येष आत्मेति तद्यत्रैतत्सुप्तः सम
स्तः संप्रसन्नः स्वप्नं न विजानातीति सुषुप्तावस्थायामपि स एव व्याख्येयत्वेनानुकृष्यते। पुनश्चोपसंहरत्ये
वमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेनेति जीव एवेति चेत्परिचोदना निवृत्त्यर्थ
स्तु शब्दो जीवोऽत्राविर्भूतस्वस्वरूपो विवक्षितः॥ आविर्भूतं स्वरूपं यस्य सोयमाविर्भूतस्वरूप॥ परमात्म
स्वरूपेणापं जीवो विवक्ष्यते। नजैवेनजैवेन रूपेणाविर्भूतं हि तस्य जीवावस्थायां परं रूपमविद्याकाम
कामकर्मतिरस्कृतत्वात्तत्पुनर्विद्योपाधिसंपत्त्यं तेनाकारेण जीवो निर्दिश्यते॥ ततश्चापहतपाप्मा
स्यो धर्मा उपपद्यंते जैवे हि रूपे ते विरुध्यंते। यद्येवं जीवरूपोपन्यासः किमर्थमित्य एषोऽक्षिणीत्याशंक्याह
अन्यार्थश्च परामर्शः। चशब्दः संभावनायां अनादिकालप्रवृत्तस्य यादृशमात्मस्व रुकार्त्तं योऽक्षा
दिरूपं पराम्रश्यते॥ बुध्यते प्रजापतिना॥ परमरूपं भवतीकरतत्तस्य विज्ञानवत्त्वं दर्शयितुमित्यविरोधः
प्रस्यामाहित्यते च काश्चित्परं प्रतियाथतदस्मीति याहव्यंति यथा तत्त्वमसीति काश्चित्तु न जीवमेवाधिकृ
तानि तानि अनवस्थाप्रत्याख्याय ततः परमात्मरूपं दर्शयंति यथा कृतस्न आत्मा योऽयं विज्ञानमय इत्युप

कस्य अनतस्थितो शरीरः स वा एष महानज आत्मेत्युपसंहारात्। परमात्मना संपन्नस्यैकात्मनस्वरू
भट. णोक्तस्वरूपविनिवृत्तिः सा च श्रुत्या दर्शिता अशरीरं वाव संतं न प्रियाप्रिये स्पृशतः। तस्मात् शरीरात् समु
३५ त्थायत्वित्प्रारब्धकर्म्मफलभोगस्यावश्यं काविन्वाद्धि पमा शरीरस्यावश्यं भावी सुखदुःखानुभवस्त
स्मात् जीवदेवमुक्तमितियेति जानते तेऽश्रुतिमतिवर्त्ते तेत्सानु नयं वाधते। अश्रेणैव श्रूयते। इति चेत्तदुक्तं
हर श्रुतेर्न परमेश्वर इति चेत्तत्र यदुक्तं तदुक्तं पुनस्तावत् कौकस्त्वादिति। अनुकृतेस्तस्य च। न तत्र
सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं
विभातीतीयं श्रुतिस्समाम्नायते तत्र संदेहः यं भान्तमनुभाति यस्य च भासा सर्वमिदं सर्वं जगद्विशेषेण भाति स ते
जोधातुः कश्चिदथवा परमेश्वर इति। किं तावत्प्राप्तं तेजोधातुः कस्मात्तत्रेह रश्मिवदेव वाक्यशेषेः
परमात्मा निर्णीतोऽन्तु विशेषेण हेतुत्वा यावता न परोक्ष्यते। सूर्यादीनां स्व तेजःस्वभावानां भान प्रति
षेधात् तत्समानजातीयमेव तेजः प्रतीयते। किंच समानजातीयेनुशब्दो दृष्टो यथा गच्छन्तमनुगच्छतीति
प्रायेणाभिधीयते। भास्तोन विद्युम इति कुतोऽनुकृतेः अनुकरणमनुकृतिस्तमेव भान्तमनुभाति सर्वमिति
भान्तं विज्ञानानिरूपेण प्रकाशमानमनुभाति सर्वस्य यमपि प्रकाशते यथा भिंभान्तमयःपिंड एषो नु ३५
भात्यनुकरोति सर्वे चाते जो धातवस्तस्मिन्न प्रतिसिद्धा ये प्रसिद्धास्तस्माद्भौतिकाज्ज्योतिरित्यत्र ब्रह्म नि
र्दिष्टमनुगम्यते। समत्वे चानुभानं नोपपद्यते। न हि प्रदीपः प्रदीपमनुभाति। न चानुकरणं समानजा

तीयविषयमेव अश्मेरजो वायुं वहन्तमनुवहतीति। तस्य चेति श्लोकस्य चतुर्थः पादो निर्दिश्यते। तस्य
भासेति च तृतीया हेतुत्वपदेशात्तदेशाग्राह्यते। अपि स्मर्यते। प्राज्ञस्यैवात्मनः सूर्यादिप्रकाशननि मि
त्तत्वे तेषां च तत्राप्रवृत्तिः स्मार्य्यते। यदादित्यगतं तेजो जगद्भासयतेऽखिलमिति। शब्दादेव प्रमितः। अंगुष्ठमात्रः
पुरुषो मध्य आत्मनि तिष्ठति तथा अंगुष्ठमात्रः पुरुषो ज्योतिरिवाधूमक ईशानो भूतभव्यस्य स एवाद्य स
एतद्वै तदिति च श्रूयते। तत्र संदेहः किं विज्ञानात्मा उत परमात्मेति किं तावत्प्राप्तं विज्ञानात्मेति परमा
त्मश्रुतेर्न दृष्टवन्तस्तस्यायामस्य परिमाणश्रुतिरुपपद्यते जीवस्यापीशानत्वं स्वर्गे नराणां प्राप्तमव
कल्प्यते सा नित्यपाख्याने वा। अपि सत्यवतः कायात्पाशबद्धं वशंगतं अंगुष्ठमात्रं पुरुषं नि
श्चकर्ष यमो बलात् इति स्मृते जीवो निश्चीयते। तत्र ब्रूमः प्रमितः परमात्मा कुतः शब्दादेवेशानो भूतभ
व्यस्येति स ह्यैशित्वमप्रतिहतं यमाणमन्यत्र परमेश्वरं गमयति न हि जलदत्वग्मात्रात्मा तिभुक्तुं शक्यते। श्रुति ज
ह्नाणीविषये हि श्रुतिर्बलीयसी नन्वंगुष्ठश्रुतिरपि भवेत्कुं न शक्यते तत्र ब्रूमः। हृद्यपेक्षया तु मनुष्या
धिकारत्वात्। अंगुष्ठमात्रपरिमाणेन हृदयकमलमुकुलेनोपलभ्यत्वात्तत्परिमाणापेक्षया अपदे
शेन विरुध्यते। ननु कोदृशोऽयं गुष्ठमात्रतिर्गीरीशानत्वमुक्तिर्मुख्येति। तदुच्यते। एतद्वै तदिति सर्वनामश्रु
तेः प्रकृतपरामर्शहेतद्वैतत् स्वसंबन्धलेप्सये अन्यत्र धर्मादन्यत्राधर्मादित्यत्रास्मात्कृताकृतादन्यत्र भूत
भव्याच्च यत्तत्पश्यसि तद्वदेति। ननु हृदयानाममनवस्थितत्वात्तद्रूपेक्षयां गुष्ठमात्रतिर्न शक्या नेतुं गं तो

भट॰ ५०

च्यते ॥ मनुष्याधिकारत्वान्मनुष्यहृदयापेक्षयोपपद्यते । तेषां हि श्रौतस्मार्त्तेषु कर्मस्वधिकार
इतिषष्ठे ऽधिकारलक्षणे स्थापितं ॥ अथ यत्तस्य व्रतः कायादिति च दुक्तं जीवाभिप्रायं तस्य लोकव्य
वहारस्य प्रकृतप्रतिपादनतायोपविरुद्धं ॥ तदुपर्य्यपि बादरायणः संभवात् ॥ मनुष्यहृदयापेक्षयाङ्गु
ष्ठश्रुतिः । परिस्तुक्तं तेषां शास्त्रे ऽधिकारादिति तत्प्रसंगेन देवानामपि परविद्यायामधिकारप्रतिपादना
र्थमिदमधिकरणमारभ्यते ॥ तदुपर्य्यपि मनुष्याणामुपरिष्टाद्ये वर्त्तन्ते देवादयस्तानप्यधिकरोति
शास्त्रमिति बादरायण आचार्यो मन्यते स्म ॥ कुतः तेषामप्यर्थित्वसंभवात् । अपवर्गविषयमर्थित्वं
संभवति प्रपंचविषयस्यैश्वर्यस्यानित्यत्वदोषपर्य्यालोचनात् । सामर्थ्यमपि संभवति मन्त्रार्थवादे
तिहासपुराणेभ्यो विग्रहवत्त्वाद्यवगमात् । प्रजितानं च तेषां सार्वत्रिकमस्ति ॥ तथा चाग्ने नय सुपथे
ति मंत्रो ऽग्नेः सर्वज्ञत्वं दर्शयति विश्वानि देव वयुनानि विद्वानिति वयुनानि ज्ञानानीति लिंगं । चन्द्रस्य क
शतं ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्यमुवास । भृगुर्वै वारुणिर्वरुणं पितरमुपससारेति । व
कर्मानधिकारकारणं च देवादिवतां तदभावात् इत्यादि इह नास्ति । परविद्यायामनो वृत्ति मात्र विषयत्वा
त्किंपुनः कारणं महातपले न देवानामधिकारानां च साधुत्वं सालोक्यं च फलं श्रूयते तथैवं श्रुतिचावभासा
नामपि मनुष्याणां कथनामब्रह्मविद्याभ्यासात्तत एवमु ॥ ः प्रतिपाद्यते अस्ति प्रयोजनं ब्रह्मोपासन
सिद्ध्यर्थं तावद्धि ग्रहवत्त्वादिति पादनं कर्तव्यं शरीरेन्द्रियमनोभिर्विनोपासनानुपपत्तेस्तदु पा ५०

सका । किं इनोपासेन स्यादित्येवमिदं निरूप्यते । तद्यो यो देवानां प्रत्यबुध्यतेति दर्शनात् विरोधः कर्मणी
ति चेन्नानेकप्रतिपत्तेर्दर्शनात् । विग्रहवत्त्वमस्याः देवदेवानामेवं वंसत्यभ्युपगन्तव्यं ॥ श्रवणमनननि
दिध्यासने पुनः शरीरेन्द्रियमनोयुक्तस्य प्रवृत्तिसंभवात् । न तस्य कर्मणि यागे विरोध इति चेत्तायं विरोधो ऽनेक
प्रतिपत्तेरनेकविग्रहप्रतिपत्तेरित्यर्थः । कुपं गम्यते दर्शनात् कति देवा इत्युपक्रम्य त्रयश्च त्री च शता त्रयश्च
त्री च सहस्रेत्युक्त्वा महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इत्येकैकस्यानेकरूपतां दर्शयति योगशास्त्रे
ऽपि चानेकशरीरयोगं योगिनां वर्णयंति । प्राप्नुयात्किन्यायात्केश्चित्कैश्चिदुग्रं तपश्चरेत् ॥ संक्षिपेच्च पुनस्ता
नि सूर्यस्तेजोगणानिवेति । ततश्चैकरूपयागेषु सन्निधानमदृश्यत्वं वान्तर्धानशक्तियोगादुपपद्यते ॥ अ
नेकप्रतिपत्तेर्दर्शनादित्यस्यापराव्याख्या अनेका नानारूपप्रतिपत्तिः तस्या दर्शनाद्यथैको विप्रो युगप
दनेकैर्लोकैर्भोजयितुं न शक्यते स एव स्वस्थाने स्थितो युगपदनेकैर्नमस्क्रियते । तथा स्वस्वस्थानस्थितां
देवतां उद्दिश्य स्वं स्वं द्रव्यमुत्सृजतीत्युपपद्यते ॥ शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्यां । विग्रहव
त्वे ऽभ्युपगम्यमाने ऽपि विग्रहवत्त्वस्य सत्त्वात् नित्यत्वं प्रसज्यते ॥ ततश्च वैदिके । वस्वादिशब्दे देवतादिवाचिनि विरो
धः स्यादुत्पत्त्यादिमत्त्वप्रसङ्गादिति चेन्नास्ति विरोधः ॥ कस्मादतः शब्दादेव जग ------ —
तः प्रभवात् उत्सृष्टेः प्रलयकालेपि हिरण्यगर्भस्य उत्पन्नरूपेण वेदराशिरवस्थितः । सृष्टिवेलायां परमेश्वरा
नुग्रहाद्यस्य शरीरादिर्णो हिरण्यगर्भस्य यः पूर्वस्मिन्जन्मनि वेदे तैनत्र गावनयानसंज्ञा पतिर्ने विष्मामीति

कर्म्मकृतवान्स हिरण्यगर्भ उच्यते तस्य मनसि वेदोऽर्थात्तरमनापन्नः सुषुप्तप्रतिबुद्धस्यैव प्रादुर्भव
मू.८ ति तेन भगवदीयस्थानी येन सुरनरतिर्य्यगादिसृष्टिं जगदभिधेयमेवं निर्मिमीते॥ अयमत्र प्रस्तावाभि
४१ प्रेतो जन्माद्यस्य यत इत्युपादानकारणविवक्षयोक्तं कथमिदं गद्यते प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यामि
त्यर्थः प्रत्यक्षं श्रुतिरनपेक्षत्वादनुमानं स्मृतिरनुमीयमानश्रुतिसापेक्षत्वादेतदिति वै प्रजापतिर्देवानसृ
जत असृग्रमिति मनुष्यानिन्दव इति पितॄंस्तिरःपवित्रमिति ग्रहानाशव इति स्तोत्रं विश्वानीति शस्त्र
म भिसौभगायेत्यन्याः प्रजा इति स्मृतिरपि॥ अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा॥ आदौ वेदमयी
दिव्या यतः सर्वाः प्रवृत्तय इत्यैशाणिका॥ तथा नामरूपञ्च भूतानां कर्म्मणां च प्रवर्त्तनं॥ वेदशब्देभ्य ए
वादौ निर्म्ममे स महेश्वरः॥ सर्वेषां च स नामानि कर्म्माणि च पृथक् पृथक्॥ वेदशब्देभ्य एवादौ पृथक्सं
स्थाश्च निर्ममे इति। कः पुनरत्र शब्दोऽभिप्रेतो वर्णात्मको लोकप्रसिद्धो रूपवर्षाचार्य्यागमात्तु नवैयाकर
णकल्पितः॥ स्फोटस्तस्य चानुपपत्तिरुक्ता प्रथमतन्त्र इत्यत्र नोच्यते॥ अबहुश्रुतप्रतिपत्त्यर्थं हि स्वात्र
प्रदर्श्यते॥ स्फोटः शब्द इति ज्ञाते स एव चार्थप्रत्यायको वाचकरूपेणास एवावस्थितो व्यवहारहेतुर्व
र्णध्वन्यन्तररूपाभानस्तात्पदिकल्पिताः॥ किंच वर्णेभ्योऽप्रतीतिर्नोपपद्यते॥ कथमेकैकवर्णोपल ४१
ब्धिप्रतीत्यभावान्नच समुदायवदवतिष्ठते क्षणध्वंसित्वान्नच तदुपलब्धिरर्थप्रतीतिहेतुस्तस्याः
स्वस्मात्क्षणिकत्वात्क्रमभावित्वाच्च॥ अत एव वर्णस्मृतिरपि क्षणध्वंसित्वान्न च तदुपलब्धि

र्थप्रतीतिहेतुस्तस्याश्च क्षणिकत्वात् क्रमभावित्वाच्च॥ अत एव वर्णस्मृतिरपि नार्थप्रतीतिहेतुः॥ पू
र्वपूर्ववर्णजनितसंस्कारसहितादन्त्याद्वर्णादर्थप्रतीतिरिति चेत्॥ न संस्कारकल्पनायां प्रमाणाभावात्॥
केन पुनः प्रमाणेन स्फोटो गृह्यते प्रत्यक्षेणेत्याह॥ तथा हि गौरित्युक्ते अक्रमैकाकार एव बुद्धिरुत्पद्यते॥ त
था चाह॥ नादैराहितबीजायामन्त्येन ध्वनिना सह॥ आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्य्यत इत्यत्र क्रमो
गौरित्यत्र गकारौकारविसर्जनीया इति॥ भगवानुपवर्षाचार्य्य इत्यागमपरम्परया तन्यापोयपत्रे पर्णञ्च व
र्णानां शब्दत्वं कथमन्यदेवदत्तादिशब्देषु श्रोत्रेण वर्णा एव गृह्यन्ते॥ अध्येतारश्चोपाध्यायसकाशादु
पश्रुतस्वरमात्रान्तरक्रमयुक्तान्वर्णान्मनसावधार्य्य वर्णांस्तथैवोच्चारयन्त एकैकस्य वर्णस्य वाऽन्यथा
करणे यज्ञापित्वात्तथा रूपप्रतिपादनं कुर्वन्तो दृश्यते॥ स्वप्नेऽप्यवग्रह एककाले च यावत्तो यास्यर्थं नत्रयुक्तं ते
वर्णास्तेषामेव सम्यग्ध्यायिनः पाश्वस्याः प्रतिपद्यन्ते न वर्णव्यतिरिक्तस्य स्फोटस्य स्फोटस्यानुपलब्धिस्तस्या
सम्बन्धात्कालान्तरे च तेभ्य एव च यथावधारितसम्बन्धेभ्योऽर्थप्रतिपद्यते॥ यावदि श्रावणं वर्णानां वाच
कशक्तिव्यासज्यवर्त्ती प्रतीतामात्रस्यैवैकाकारा बुद्धिरुपपद्यते॥ अत एवैकबुद्धेरन्यथासिद्धत्वात् किं
निमित्ता स्फोटकल्पना॥ अथ वर्णेभ्योऽर्थप्रत्ययानुपपत्तेरिति चेद्वर्णानां स्फोटाभिव्यक्तावनुपपत्तिः
समाना॥ न च गकारोच्चारणे जायापदसंस्कारः प्रतीयते॥ अथ चेत्कश्चित्॥ कयालयमवर्णवेजाधा न
व्यभिव्यज्यत इत्यस्तु नवरः ... किमुत्तरः स्यात्तत्र पूर्ववर्णजनितसंस्कारसहितेन वर्णेन स्फोटोऽभि

म.ट.
४२
कल्प्यत इत्युपपन्नं॥ तत्र संस्कारवर्णकल्पनात्स्फोटकल्पना तस्य वागृहीतसम्बन्धस्य वाच
कत्वं किं कल्प्यतेति कल्पनान्तरमस्मत्पक्षे संस्कारकल्पनामात्रमिति विशेषोपि संकलनाप्रत्ययसमारू
ढास्त्रयो वर्णा वाचकास्तैस्ते पांसच्युन्धर्थं गृहणन्तः कल्पाद्धिरण्यं तरस्यत्वा पद्यन्तीति सर्वे प्रांकप्र
त्यक्तास्तस्माद्वर्णा एव शब्द इति स्थितं॥ अतएव च नित्यत्वं॥ यदुक्तं क्रियाहवचे सत्य नित्यत्वं वेदस्य
प्रामाण्योस्य नित्यार्थाभिधानादिति॥ तत्र प्रश्नः तएव शब्दप्रभवत्वात् शब्दपूर्वकत्वात् सृष्टेः शब्दार्थसम्ब
न्धा॥ नाम्नत्यानां नित्यत्वं संबन्धकर्तृध्यास्मरणादिति च गवादिशब्दानां तावद्दृष्ट व्यवहारे ऽन्वयव्यति
रेकाभ्यामाकृतेरर्थः॥ नहि प्रलयोस्यामाकृतिरत्यंतं विनाशोऽभिप्रेयते सुषुप्त्यवस्थायामेव सूक्ष्मतापत्तिमात्रं
विद्यमानस्य चाभिव्यक्तीकरणमात्रं सृष्टिः॥ कथं समाननामरूपत्वात्कल्पान्तरातीते रिन्द्रादिभिः कल्पादौ
सृज्यमानानां नामवाचकः शब्दः रूपमाकृतिः कथंतु रूपनाम रूपत्वं गम्यते दर्शनात् स्मृतेश्चायो ब्रह्माणं
विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति श्रुतेः॥ तथा
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्॥ यथा पूर्वस्मिन् कल्पे धाता॥ प्रजापतिः॥ स एवं तथा॥
स्मिन्नपि कल्पे सूर्याचन्द्रमसावकरोदित्यर्थः॥ तथा यो ह वा अविदितार्षेयच्छन्दो दैवतब्राह्मणेन मंत्रेण ४२
याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा प्रपद्यते इत्युपक्रम्य तस्मादेतानि मंत्रे विद्यादिति श्रु
त्योर्श्रुतिः॥ शौनकादिभिर्मधुच्छन्दप्रभृतयो ऋषीनिलादीनां च नामरूपः स्मर्यते॥ स्मृतिरपि ऋषी

णीनां नामधेयानि याश्च वेदेषु दृष्टयः॥ सर्वर्यन्ते प्रसूतानां तान्येवैभ्यो ददात्यजः॥ यथर्त्तुष्वृतुलिंगा
नि नानारूपाणि पर्यये॥ दृश्यन्ते तानि तान्येव तथा भावा युगादिषु॥ तथा जैमिनिनोपि तत्तु॥ व्यासेन सांप्र
तेपि हादेवादेवैरतीते शब्दरूपैर्नामभिरेव चेत्सन्नमीमांसकान्यथोपस्यति॥ कथं युगादौ कस्यचित्पुरुषस्य सं
प्रदायमन्तरेण वेदग्रहणमिति कस्य चापप्रतिभाने वेदस्याहुलेकत्वे प्रसज्यते॥ अत्र वदामो वेदस्य तावत्स्वभा
एप्रामाण्यमपादी केन न्यायेन वाच्यवाचकसम्बन्धं नित्यत्वात् स्वार्थप्रमाणकर्तृकत्वात् प्रथायादिवदनपेक्षत्वाद
नधिगतार्थगन्तत्वाद्बाधयोः समानानस्वसिद्धार्थस्वरूपे प्रामाण्यं च पुरस्तात्प्रतिपादितं॥ तेनर्थया स्वर्गा
स्तित्वं वेदान्प्रतिपद्यते तथाहु प्रत्यि सृष्टि स्थिति प्रलय कारणं परमात्मानं सर्वज्ञं सर्वशक्तिं प्रतिपद्येच॥
सर्वज्ञः प्राणिनामुपभोग कालं ज्ञात्वा प्रथमं भूतसूक्ष्मान्व्याकृताकाशं सृजति तदनंतरं हि
रण्यगर्भं तस्मिन्ननुप्रविश्य तद्वारा तेनात्मना स्थित्वाकाशादिक्रमेण स्थूलं सृष्ट्वा ततः स्थावरपर्यन्तं सृजति प्रा
णिनां कर्मानुरूपेण न च तस्यात्मनः प्रयोजनं किंचित् तस्याप्तकामत्वात् य एष आत्मापहतपाप्मा विजरो विमृत्युः स
त्यकामः सत्यसंकल्पादिश्रुति शयानन्द सद्भावश्चायते॥ एतस्यैवानन्दस्यान्यानि भूतानि मात्रा
मुपजीवन्तीति संसारिणः सर्वे तदीयमेवानन्दं कदेशमुपजीवन्तीति श्रुतेः तस्य प्रयोजनाभावं दर्शयति
स्वभावतस्तत्प्रवर्त्तते तन्नयथेदं जगदादिर्भवति पुनश्च तस्मिन्नेव प्रलयकालेऽवतिष्ठते॥ तथा वे
दोपि तस्मिन्नप्रलीनप्रतीतः समाप्ते तत् रघुयहारत् प्रजापतेर्मनसि प्रादुर्भवन्ति न कश्चिद्दोषः

भट. ५३ परमात्मनश्च नित्यत्वात्तद्धात्मत्वाच्च वेदस्य सुतरां नित्यत्वमुपपद्यते। संसारस्य वा नादित्वात्।। यथा
तत्र स्मृता वस्थायां वेदः प्रवीणाद्वप्रतीबोधे च तिर्भवति तथा सृष्टिप्रलय बोधितिस्थिते।। मध्वादिषु सं
भवादनधिकारं जैमिनिः।। असौ आदित्यो देव मध्वित्यादिषूपास्यान्तरास्ता वादित्यत्व वस्वादीनामनधि
कारः सिद्धस्तत श्च विद्यात्वसामान्याद्ब्रह्मविद्यायामनधिकारं जैमिनिर्मन्यते स्म।। नन्त्व समर्थो हि तु वि
द्यात्वसामान्यादिति। न हि कश्चिदनधिकारादन्यत्रानधिकारो नुमातुं शक्यते। कर्मकांडे तथा दर्शनात्। इत्या
शंकायामाह।। ज्योतिषि भावाच्च।। ज्योतिर्मण्डले सविता द्युःशब्दः प्रयुज्यते न विग्रहवतीष्टदेवतासु।। अ
विग्रहवतां चेन्द्रादीनां कथमधिकार इति। मुख्य हेतूपन्यासः।। भावं तु बादरायणोऽस्ति हि।। तु शब्
दः पक्षव्यावृत्तावधिकारसत्तावं तत्र भगवान्बादरायणो मेने।। यस्माद्धि स्ति श्रोतं दर्शनं। तत्त्वं यो देवानां
प्रत्यबुध्यत स एव तदभवत्तथर्षीणां तथा मनुष्याणामिति। इन्द्रो ह वै देवानामभिप्रवव्राजेति च। यच्चोक्तं वि
ग्रहवत्त्वं नास्तीति। तदयुक्तमुपनिषत्सु देवतोपासनस्य तत्प्राप्त्यादि प्राप्ते श्चाभिधानाद्देवो भूत्वा दे
वानप्येतीति तथा कति देवा याज्ञवल्क्यो तु पक्षप्राचयपक्ष वत्रीनसहं स्ते स्य नेकरूपो माप्रानमैश्चर्य्य
गां दुपन्यस्य महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति तात्पर्य्यतो देवतानिरूपणं ब्राह्मणे चोक्त
म् एष वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्चेतीन्द्रो वषट्कारशब्देन तत्रोक्तोऽपि च ५३
मन्त्रार्थवादेतिहासपुराणेभ्योऽप्युक्तैश्वर्य्योपेताः समधिगम्यन्ते न च मन्त्रार्थवादमात्र वस्यज्ञान

स्य मिथ्यात्वं वदितुं शक्यं करणदोषबाधकप्रत्ययाभावात्। त्रिधा हि मंत्रार्थवादाः।। प्रमाणांतरविरुद्धा
र्थवादिनो विरुद्धार्थविषयाः प्रमितार्थाश्चेति।। यथा धूम एवाग्नेर्दिवा ददृशे नार्चिरिति। अग्निर्हिमस्य भे
षजं। एतद् एव सते। जस्वीन्नाद इंद्रियावी यशमान् भवतीति। तत्र विरुद्धार्थे गुणवादो वति इष्टतिः तत्रा
पि यो वर्षिष्ठो ऽत्यादेव गुणनिष्ठता प्रतीयते।। प्रमितार्थाविरुद्धार्थेऽनुवाद इति एते। तत्रापि यो वा
पयोवादे वगुणनिष्ठता प्रतीयते। अप्रमितार्थाविरुद्धार्थे पत आमनमा। एमेवालम्बनं युक्तं न हि निरालम्ब
नं विज्ञानमस्तीति स्थितं निरालम्बनवादे। ननु परार्थत्वादर्थवादानां श्रूयमाणार्थत्वं नास्तीति तदिद
मसमीक्षितं न हि परार्थत्वं मिथ्यात्वहेतुः। उभयं हि मिथ्याकारणं करणदोषो बाधकप्रत्ययो
वेत्युक्तं।। न ह्यप्रयाजादीनां सकृत्पाकावः परार्थत्वादभ्युपगम्यते। न च गर्भदासादीनां विद्यमानस्य
हि स्वार्थतापरार्थता वा नास्ति तः शंश विभागोपयोगित्वाच्चावश्चिं इन्द्रादत्क्र। तिर्वा प्रयोजनं कथाण स्यो
त्पंयं दृश्यते।। अर्थवादगतेभ्यः पदेभ्यः पदार्थप्रतीतिः ततो वाक्यार्थावगतिः। तस्या स्तक्र लघ्वधु
रूपार्थोपयोगित्वा भावात्वेन्द्रास्तत्कृतिर्वा प्रयोजनं कल्प्यते। न हि प्रयोजनवशात्सदसत्त्वे किं तर्हि प्र
माणवशात्। तत्र जो ऽपि च दतो विग्रहवत्त्वादि प्रतिपमानं प्रमाणान्तरविरुद्धं च प्रतीतिशरणैर्युक्तम
भ्युपगन्तुमिति च विधिभिरेव रूपवत्त्वमपेक्षितमेवं हि श्रूयते। यस्यै देवतायै हविर्गृहीतं स्या
त्तां ध्यायेद्वषट्करिष्यन्निति। नीरूपस्य ध्यानानुपपत्तेर्मन्त्रार्थवादसमर्पितं रूपमाश्रयणीयं न

ब्र०
४४
सुद्धिकल्पितमित्यस्मिन् प्रसंगेन प्रत्युक्तं देवताधिकरणे विग्रहवत्त्वादिनिराकरणं तद्देवतात:
फलमपि निरस्तं व्याख्यातो मन्यते तद्विनिवेशनिराकरणमात्रपरमिति द्रष्टव्यं ॥ शुगस्य तदनादर
श्रवणात्तदाद्रवणात्सूच्यते हि ॥ मनोह्यमनोहि मनोवृत्तिमात्रस्य ध्यानात् विद्याया: शूद्रस्याप्यधि
कारत्वमाशंक्य निराक्रियते । लिङ्गदर्शनाच्च ॥ संवर्गविद्यायां जानश्रुतिं पौत्रायणं शूद्रशब्देन परामृ
शति अहहारेत्वा शूद्र तवैव सह गोभिरस्त्विति । सिद्धान्तस्तु ॥ न तस्य वैधत्वात् कर्मणीव ब्रह्मविद्याया
मनधिकार उपनयनाध्ययनाद्यधिगम्याभावाच्च । लिङ्गं पुनर्न तत्समर्थं ॥ यौगिकस्तत्र शूद्रशब्द:
प्रयुक्त: कथं । हंसवचनादस्य जानश्रुते: शुगुत्पन्ना शोको जात: कम्बर एनमेतं सन्तं सयुग्वानमिव रैक्व
माहेत्यनादरश्रवणात्तदनन्तरं तापपरिघातितद्दृश्य योरैक्वमुपस्तिमाद्रवणाद्गमने तस्याचेतो:
शूद्र इत्युक्तं किंपुन: कारणं शूद्रशब्देनाप्याति मन्यामीति सज्यते । हि रैक्वेण राज्ञ: शुगुत्पन्नी आत्मन: परो
त्कर्षोत्स्वापनापना हं रूपणे धनार्पस्य वेत्तोस्मीति मन्वा: रायितुं ॥ क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथे
न लिङ्गात् ॥ इतश्च जानश्रुते: क्षत्रियत्वं कथं संवर्गविद्याया मुत्तरत्र वाक्यशेषे चैत्ररथेनाभिप्रता
रिणा सह समुच्चरणाल्लिङ्गाद्गम्यते । समानजातीयानामेव एकस्यां विद्यायां संकीर्तनं युक्तं । किंपुनस्त ४४
ल्लिङ्गं अथ ह शौनकं च का — पेयमभिप्रतारिणं ब्रह्मकेन योगादेतेन चैत्ररथं कापेया याजयेयुस्तामेका
किनं यज्ञादयस्याध्यात्तःकुर्वंस्तस्माच्चैत्ररथानामेक: क्षत्रपतिर्जायत इति छन्दोगानां श्रि

चेष्यते ॥ संस्कारपरामर्शात्तदभावाभिलापाच्च ॥ इतश्च विद्यायामनधिकार: संस्काराद्युपनयन
स्य तस्य परामर्शात् संकीर्तनात् विद्याप्रदेशे तं होपनिन्ये अधीहि भगव इति । तस्य वाभावाभिलापादभिधाना
त् शूद्रश्चतुर्थो वर्ण एकजातिर्न च संस्कारमर्हतीति स्मृते: ॥ तदभावनिर्धारणे च प्रवृत्ते: ॥ शूद्रत्वाभावनिर्धारि
ते निर्णये सति जाबालमुपनेतुमनुशासितुं च गौतमस्य प्रवृत्ते: समिधं सोम्याहरोपत्वा नेष्ये न सत्यादगा
इति । श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च श्रवणाध्ययनतदर्थपरिज्ञानतदनुष्ठानानां प्रतिषेधाच्च
स्मारणात् वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रपरिपूरणं तस्मात् शूद्रसमीपे नाध्येतव्यमिति ॥ कम्पनात् ॥
कठवल्लीषु पठ्यते । यदिदं किंच जगत्सर्वं प्राण एजति नि:सृतं महद्भयं वज्रमुद्यतं य एतद्विदुरमृता
स्ते भवन्तीति । तत्र संशय: किं पंचवृत्तिर्वायु: प्राण: किंवा ब्रह्मेति । किं तावद्युक्तं प्रसिद्धेर्वायु: प्राण:
स महद्भयं वज्रशब्दाभ्यां चावस्थित: ॥ यद्यपीदं ब्रह्मप्रकरणं तथापि श्रुतिर्बलीयसीति पूर्व: पक्षस्तत्र
जगत्यपि वर्तमानमेजति कम्पते कजपरानि: प्रसिद्धे: ॥ एवं प्राप्ते ब्रूमो ब्रह्मैवेति पक्षत्वं कस्मात् पू
र्वापरपर्यालोचनात् प्रतीतिस्तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते इति पुरस्तादुपक्रमादुत्तरत्रापि
भयादस्याग्निस्तपति भयात्तपति सूर्य: भयादिन्द्रश्च वायुश्च मृत्युर्धावति पंचम इति तन्मध्ये तत्रा
पि भयादस्या । पति तस्मिन्वाक्ये ब्रह्मैव निर्दिश्यते न वायु: कस्मात् जगत: कम्पनात् ब्रह्मणो हि नि
खिलं जगद्दितालंभते स्वव्यापारे नियमेन प्रवर्त्तत इत्यर्थ: ॥ ज्योतिर्दर्शनात् ॥ ० ॥ एष संप्रसा

भ० ४५

दस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत इति। तत्र संदेहः तमोपहं
तेजः किंवा ब्रह्मेति किं तावद्युक्तं तमोपहं तेजः प्रसिद्धेः। अपपदतः परो दिवो ज्योतिरिति परब्रह्मविशेषणा
त्परं ज्योतिरित्यध्यवसितमिह तत्रास्तीति पूर्वः पक्षः सिद्धान्तस्तु तद्ब्रह्म प्रतिपादनाय प्रकरणास्समुत्था
य आत्मापहतपाप्मेत्युपक्रमादेतं त्वेव ते भूयोऽनुव्याख्यास्यामीत्यनुसन्धानाच्छरीरं वाव सन्तं न प्रिया
प्रियेस्पृशत इत्यवधारणादशरीरो वायुरिति च दृष्टान्तोपादनात्परमकारणं ज्योतिर्जीवस्योपसंपत्तव्यमुप
पद्यत इति परस्मिन्नाविर्ज्योतिः शब्ददर्शनादिति स्थितं॥ आकाशोऽर्थान्तरत्वादिव्यपदेशात्॥ आकाशो वै
नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मेति श्रूयते॥ तत्र संदेहः किं भूताकाशः किंवा
पर इति॥ भूताकाश इति प्राप्ते॥ अवकाशदानेन तस्य नामरूपनिर्वहणं संभवतीति प्राप्ते उच्यते॥
पर एवाकाशः कस्मादर्थान्तरत्वेन व्यपदेशात् आकाशस्य ते यदन्तरेत्याकाशस्यापि नामरूपत्वात् व्यति
रेकेण निर्देशान्नामरूपादिशब्देन ब्रह्मत्वामृतत्वात्मत्वसंकीर्तनं युज्यते॥ आकाशस्तल्लिङ्गादिति स्पष्टलिं
गं नामरूपनिर्वहणमन्यत्रापि स्यादित्ययं अतिरेकः॥ सुषुप्त्युत्क्रान्त्योर्भेदेन व्यपदेशादिति वर्तते
बृहदारण्यके षष्ठप्रपाठके कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इत्युपक्रम्यात्म ४५
विषयं निरूपणं क्रियमाणं किं संसारिस्वरूपपरं किंवा परमात्मस्वरूपपरमिति संशये विज्ञान
मयः प्राणेष्विति लिङ्गात्संसारिस्वरूपप्रधानमन्वाख्यानमिति प्राप्ते ब्रूमः परस्वरूपपरमिति॥ कुतः

सुषुप्त्युत्क्रान्त्योश्च शारीरात्भेदेन परस्य व्यपदेशात् प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद
ति प्रसुप्तस्यावस्थाविशेषेण यात्रद्धयायुक्तः प्राज्ञः परमेश्वरस्तेन संपरिष्वक्तो जीवः तथोत्क्रान्तावप्यशारी
र आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन्यातीति श्रुतः पुनरुपक्रमे प्राणसंबन्धः सोऽनुवादः प्रमाणान्तर
सिद्धेः॥ सर्वोपाधिरहितचैतन्यानन्दस्वरूपप्रतिपादनाय च तथाहि स वा एष महानज आत्मेत्युपसं
हारः असंगो ह्ययं पुरुषोऽनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवतीति॥
स एष पाप्मासंस्पृष्टः समस्तशोकातीतं विज्ञानात्मनः परं रूपं परमात्मसंज्ञं दर्शयति॥ पत्यादि
शब्देभ्यः॥ इतश्च सर्वस्य वशी सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिरिति पत्यादिशब्देभ्यः प
रमात्मनिश्चीयते॥ ॥इति शारीरकमीमांसाभाष्ये भगवद्भास्करप्रणीते प्रथमाध्यायस्य तृतीयः
पादः॥ आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च॥ आनुमानिक
मनुमानगम्यं प्रधानमप्येकेषां शाखिनां शब्दवदुपलभ्यते॥ अपिशब्दः संभावनायां कठवल्ली
षूपलभ्यते॥ महतः परमव्यक्तमव्यक्तात्पुरुषः पर इति पुरुषो भोक्ता व्यक्तं प्रधानमिति तत्क्रमः
सांख्योक्तः प्रत्यभिज्ञायत इति चेन्न शरीरस्य रूपकविन्यस्तस्याव्यक्तशब्देन ग्रहणात् केनचित्सा
दृश्येन वस्त्वन्तरे वस्त्वन्तरकल्पनं रूपकं॥ यथाचारतामृतं चक्रवाकस्तनीति॥ आत्मानं रथिनं विद्धि
शरीरं रथमेव तु॥ बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥ इन्द्रियाणि हयानाहुर्विषयांस्तेषु

नट॰ ४६ गोचरान्॥ आत्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति रथकल्पनं दर्शयित्वेंद्रियादिभ्यः परत्वेन सो
पानः पारमाप्नोतीति तद्विष्णोः परमं पदमिति दर्शयति। कथमिंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः॥ पुरुषान्न परं किंचित्सा काष्ठा सा
परा गतिरिति इंद्रियेभ्यो ह्यर्थानां परत्वमतिमहत्वादुत्कृष्टत्वं च नोत्र परशब्दः॥ पूर्वस्मिन्नयं ये शरीरस्य
सन्निधानादव्यक्तं शरीरं प्रतिपद्यते पारिशेष्याच्चेति च शब्दः सर्वस्मात्परमपदस्य परत्वमिह विवक्षितं।
दुर्विज्ञेयत्वात्तथा चैष सर्वेषु भूतेषु। गूढोत्मा न प्रकाशते॥ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शि
भिरिति वैसवस्य पदस्य दुर्दर्शत्वमुक्त्वा तत्प्रतीत्युपायं दर्शयति। यच्छेद्वाङ्मनसि प्राज्ञस्तद्यच्छेज्ज्ञान आ
त्मनि ज्ञानमात्मनि महति तद्यच्छेच्छांत आत्मनीति वाचं समस्तवाह्येंद्रियव्यापारं मनसि संयच्छेदित्यर्थः
तच्च मनो ज्ञानात्मनि बुद्धिस्वरूपे नियमयेद्येन मनो नाम संकल्पवाक्सस्मरणहेतुः। बुद्धिः पुनरध्यवसाया
त्मिका तस्याश्च धर्मोहंकारः तेषु हि मनसो ह्यन्तःकरणेष्वेतद्वादिनं इच्छतीमां तां बुद्धिं महत्यात्मनि
हे जोरुरस्याद्येपता तं वशां ते प्रपंचातीते सर्वव्यापिन्यहं तत्र से सं स्त्र ज्येत्स एवाहमस्मीति भावयेत्॥
सनकादोब्रयोगशास्त्रे अप्युक्तेषु योगः प्रदश्यते। ध्यानं धारणसमाधीरिति ध्यानमभिप्रेतार्थ आस्य
थि विलेकाग्रता च्यते॥ आर्द्रींद्रियबुद्धिमनसां युगपत्साधानं धारणा॥ अरा तप्रपञ्चल्पास्थानिस
चित्तासमाधिः॥ उक्तं च सनकोन॥ न योगाद्दुत्तमं ह्यस्ति योग एव परा गतिः। देवानहर्षीयश्चैवयोगे ४६

नश्रेएतागता॥ भिक्षुयत्नानोपिकुर्वंति निग्रहं मनसः सदा। न निर्वेदं सुकीर्तिं च तु यो देवा न तो हित भि
ति॥ नस्तत्सूक्ष्मं तु तदर्हत्वात्॥ कथं पुनः शरीरमव्यक्तशब्दार्हमित्याशंकानिवृत्त्यर्थस्तु शब्दः शरीरकारणं भू
तसूक्ष्मं तु तदर्हत्वात्॥ कथं पुनः शरीरमव्यक्तशब्दार्हमित्याशंकानिवृत्त्यर्थस्तु शब्दः शरीरकारणं भूतसू
क्ष्मम व्यक्तमीश्वरशक्तिरूपं तत्त्वमुच्यते॥ तन्नं॥ यः सर्वोपि मा काशादि रचेतनं प्रपंचो जायते॥ कारणानु
का कार्यस्य रूपमपि शरीरस्य सूक्ष्मं कार्यकारणयोरनन्यत्वादित्यभिप्रायः॥ किंपुनः कारणं स्थूलशरीरे
प्रकृत्यल तत्सूक्ष्मं व्यपदिश्यते। तदर्हत्वादव्यक्तशब्दाभावात्॥ तदधीनत्वादर्थवत्॥ यस्माह्तत्तत्त्वमभ्यु
पगम्यते तदेव नः प्रधानमिति त्वा धांवाहत दधीनत्वात्परमेश्वराधीनत्वादव्याकृतावस्थायाः तदभिप्रेतं नित्य
मचेतनं प्रधानं न सिध्यति तस्याव्याकृतस्य अर्थवत्तु प्रगम्यते प्रयोजनवत्त्वं॥ नहि तेवन विनास प्रपंचो
त्पत्तिः संभवतीति केचिदिदं व्याचक्षते॥ अपर आह सूक्ष्मलिंगशरीरे स्थूलशरीरापेक्षया सूक्ष्ममि
ति व्यपदिश्यते॥ कस्मात् तदर्हत्वादव्यक्तः शब्दस्य पंचानां भूतानां प्रति पुरुषं सूक्ष्मावस्था काचित्कर्म
कारितास्ति। तदंतरप्रतिपत्तौ रंहति संचमसाध्यते॥ तस्मिल्शरीरे पंचवायव एकादशेंद्रियशक्तये बु
द्धिश्चेति सप्तदशं लिंगशरीरं सूक्ष्मं कापिलैरपि गीयते तेनैव तत्रेभ्यो बन्ध उच्यते। तेन च मुक्तो मुक्त इत्युच्य
ते॥ तदेतदाह॥ तदधीनत्वादर्थवत्। सूक्ष्मशरीराधीनत्वाद्धर्माधर्मयोः रथेवदिति दृष्टांतवचन
मिंद्रियेभ्यः परत्वं यथार्थानां तथा महतोजीवादव्यक्तस्य परत्वं शरीरं रथमित्यत्रापि लिंगश

रीरमुपात्तं तेन विना संसरणभोगयोरन्याबाधतः प्रकृतमेव सूक्ष्मशरीरमित्युपपन्नं द्वितीयं व्याख्यानं
लिंगशरीररहितः परमात्मेति ततः परत्वं तस्योपपद्यत इति ॥ ज्ञेयत्वावचनाच्च ॥ ज्ञेयत्वेन सांख्यैः प्रधानं
स्मर्यते ॥ गुणपुरुषविवेकज्ञानान्मुक्तिरिति ॥ हि तद्वचनात्र प्रधानस्योक्तं ॥ वदतीति चेन्न प्राज्ञो हि प्र
करणात् ॥ ज्ञेयत्वं वदतीयं श्रुतिरिति चेद् अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् अनाद्यनं
तं महतः परं ध्रुवं । निचाय्य तं मृत्युमुखात्प्रमुच्यत इति ॥ न प्राज्ञो हि तस्य हि प्रकरणं पुरुषान्न
परं किञ्चिदित्युपक्रमात्र च प्रधानस्य प्रक्रियास्ति । कथं पुनरीश्वरविषयं ज्ञानं जीवस्य मुक्तिकारणं नहि
जो विषये ज्ञातेऽन्येन तेऽपि रिक्तस्य ज्ञानं निवर्त्तते । वचनसामर्थ्यादिबलीतिचेन्न ॥ वचनाद्या तेनाप्य
निवृत्तावित्यस्य मुक्तिरूपपादयितुं शक्यते ॥ ज्ञानमज्ञानस्य निवर्तकं दृष्टार्थत्वात्तत्र प्रकाशकत्वात्
दीपवत् । अत्रोच्यते ॥ वर्गोऽपि पुरुषवदनंतत्वेऽपि जीवपरयोर्यदेव पररूपादर्शने सेवाविश्वासाच्च विद्य
या निवर्तते । ततश्च स्वरूपं प्रतिपद्यत इति किमत्र चित्रमत इदमुक्तं निचाय्य तं मृत्युमुखात्प्रमुच्यत इति
त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ इतश्च नास्त्यत्र प्रधानं एवशब्दो व धारणे त्रयाणामग्निजीवपर
मात्मनामुपन्यासो वक्तव्यतया प्रश्नश्च ज्ञेयतया एवमिति प्रकारनिर्देशो येनान्यारूढः प्रकारो निर्दिश्य ४७
ते ॥ स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यं स्वर्गलोका अमृतत्वं भजन्त इत्येतद्द्वितीयेन वृणे वरेण ॥ प्रश्नो येयं प्रेते विचिकित्सा म
नुष्येऽस्तीत्येके नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीय इति जीवप्र

श्नः ॥ सोऽमनस्य प्रश्नापेक्षया यं तृतीयो ब्रूमन्यत्र धर्मादन्यत्रास्मात्कृताकृतात् ॥ अन्यत्र भूताच्च भव्याच्च
यत्तत्पश्यसि तद्वदेति परविषयप्रश्नः ॥ उपन्यासोऽपि लोकादिमग्निं तमुवाच तस्मै ॥ योनिमन्ये प्रप
द्यन्ते शरीरत्वाय देहिनः ॥ स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतमिति जीवविषयं मतिवचनं ॥ न जाय
ते म्रियते म्रियते वा विपश्चिदिति परविषयमेव नास्ति प्रधानस्येति तात्पर्यार्थः ॥ महद्वच्च ॥ इतश्च महद
च्छब्दो बुद्धौ सांख्यैः प्रयुक्तस्तोऽन्यथा वेदे दृश्यते वेदाहमेतं पुरुषं महान्तं ॥ तथाव्यक्तशब्दः शरीरे न वि
प्यति ॥१०॥ चमसवदविशेषाच्च ॥ श्वेताश्वतराणां मन्त्रोपनिषदि श्रूयते ॥ अजामेकां लोहितशुक्लकृष्णां ब
ह्वीः प्रजाः सृजमानां सरूपाः ॥ अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति ॥ तैत्तिरी
याणामपि नारायणोपनिषदि श्रूयते ॥ अस्मिन्मंत्रे त्रिगुणात्मिका प्रकृतिः सांख्यस्मृतिप्रसिद्धा प्रत्यभि
ज्ञायते अतः प्रधानं प्रतिगम्यमेवेत्याशंक्या निराकरोति न प्रधानमनेन मंत्रेण निर्दिश्यते कस्मादवि
शेषात् नहीह तादृशशब्दानां रक्तमुक्तं वर्णाचिन्तां सर्वत्र विशेषावधमस्त्वद्वादिकिश्चमस ऊर्ध्वबुध्न
इत्यस्मिन्मंत्रे चमनक्रियायोगाच्चमसशब्दो यथा निर्दिष्टस्वरूपोऽपि न तु तत्र इतीतथार इति वाक्य
शेषाच्छिरश्चमसो गम्यते ॥ अत्र कथं विशेष इतीत्यत आह ॥ ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॥ तु
रवधारणे ज्योतिरुपक्रमो यस्याः प्रकृतेः सा ज्योतिरुपक्रमा तथा तेन प्रकारेण केशाखिनः पठन्ति

धीयते॰ ही तिहेतौ यदग्नेरोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति शाखान्तरे वि
ब्र॰ शेषदर्शनात्॥ अविशेषश्रुतिर्निर्णीयते। यथाग्नेयं चतुर्धा करोतीति विशेषश्रुत्या पुरोडाशं चतुर्धा करो
५८ तीति सामान्यश्रुतिर्निर्णीयते तद्वत्॥ कल्पनोपदेशाच्च मध्वादिवदविरोधः॥ चशब्दः संभावनायामीश्वर
दुत्पन्नायामपि चराचरप्रकृतावजारूपस्य कल्पनयोपदेशाद् विरोधो यथाकांचिदजां बहुबर्करां यदृ
च्छया कश्चिदजोनुशेते अपरो जहातीति तथेमां प्रकृतिमविद्वाननुशेते अपगतविद्यास्तिमिरो जहातीति
र्जीवानां परस्परं भेदः परमात्मना वाभेदः प्रज्ञानतरंगादीनामिव ससोवं मेचक्षिमके परोनमुच्येत इ
त्युपपद्यते एवं अध्यन्तस्य व्यवस्थायामध्यात्विद्यादित्यस्यामधुनो मधुत्वं वाचश्चाधेन्वा धेनुत्वं सादृश्या
त्कल्प्यते॥ न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च॥ यस्मिन्पंच पंचजना आकाशश्च प्रति
ष्ठितः। तमेव मन्य आत्मानं विद्वान्ब्रह्मामृतोमृतमित्यस्मिन्मंत्रे पंचसंख्या द्विविषया अपरा पं
चसंख्या श्रूयते। ततश्च पंचपंचकाः पंचविंशतिपदार्थाः संपद्यंते॥ अपंतिरश्च स्मर्यन्ते रव्यैः। मू
लप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुष इ
ति अतो न्यते॥ नसंख्योपसंग्रहादपि प्रधानादीनां श्रुतिमत्वं अपिशब्दः संभावनायां कुतः ना ५८
नाभावात्कपिलानां पंचविंशतितत्वानां पृथग्भावात्॥ अतरार्थेपंचसंख्याविनिवन्धनं

नास्ति यन्नावान्तरसंख्यानि विशेषतः संख्याशब्दो हि प्रयुज्यमानो जातिं गुणं क्रियां चोपाधय प्रयुज्यते॥ न
चान्तरालेपि पंचसंख्यानिवेशनिमित्तमन्यत्तमत्पश्याम॥ तस्मादिक्संख्येसंज्ञामिति समासोनुस
र्तव्यः पंचजनानामेकेषित। तेपंचेति संख्याया विशेष्यन्ते। यथा सप्तर्षयः सप्तेति तेमेयोपि सप्तर्षिस्तथापं
जनशब्दोपि न तत्त्वे प्रसिद्धस्तस्मादप्रमाणमितरानं अतिरेकाच्च यस्मिन्निति सप्तम्यात्मा निर्दिश्यते तथाका
शश्च प्रतिष्ठित इत्याकाशोतिरिच्यते तत्श्च सप्तविंशतित्वानि संपद्यंते॥१०॥ प्राणादयो वाक्यशेषात्॥ क
के पुनस्ते पंचजनाः प्राणादयः वाक्यशेषात् प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमन्नस्यान्नं म
नसो ये मनो विदुरिति॥ ज्योतिषैकेषामसत्यन्ने॥ माध्यंदिनानामन्नेन ग्रहणं असत्यन्ने ज्योतिषा पूर
णमेकेषां नतेत्रे प्राणादिषु पठंति पंचजनाइत्यस्मात्पूर्वस्मिन्मन्त्रे तद्देवा ज्योतिषां ज्योतिरिति प
ठंति॥ कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः॥ क्वचिदाकाशादिका सृष्टिरुच्यते॥ आत्मन आ
काशः संभूत इति। क्वचित्तेजः प्रमुखा तत्तेजोसृजतेति क्वचित्प्राणादिका स प्राणमसृजतेति॥ क्वचिद
क्रमा लोकसृष्टिः स इमांल्लोकानसृजतांभो मरीचीर्मरमाप इति क्वचिदस॥ त्पूर्विका सृष्टिरसद
इदमग्र आसीत्ततो वै सदजायतेति क्वचिदसन्निराकरणेन सत्पूर्विका सृष्टिः कथमसतः सज्जाय
तेति सत्त्वेव सोम्येदमग्र आसीदिति स्वष्टिक्रमविप्रतिपत्तेः सर्वज्ञस्यानेकं ब्रह्मजगत्कारण
मित्याशंक्य निराक्रियते चशब्दस्तु शब्दार्थे॥ यथाशब्दः प्रकारवचनो यत्प्रकारं सर्वज्ञत्वादिगुण

युक्तं ब्रह्मकारणत्वेनाभ्युपदिष्टमेकस्मिन्वेदान्ते तत्कारणस्य सर्ववेदान्तेषूक्तेर्न कारणविगानमाका
भट. शादिषु सृज्यमानेषु लपिप्रत्यं विज्ञानात् सत्यं ज्ञानमनन्तं ब्रह्मेति यदेकत्रोक्तं तदेव तदहं व्या
कृतावेति तथात्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत् स ईक्षत लोकान्नु सृजा इति॥
४९ यथा कुम्भकारो मृज्जातं निर्मिमाणः कदाचिद्घटं प्रथमं विकर्षं करोति कदाचित्तु शरावं पूर्वकं
तथापि कर्ता न भिद्यते॥ समाकर्षात्॥ यदुक्तमसद्वा इदमग्र आसीदिति असत्त्ववाक्यं श्रूय
स्यते॥ इति तन्नोत्तरं सोऽकामयतेति प्रकृतस्य समाकर्षादसद्वा इदमग्र आसीदित्यनेनान्तो केन प्रकृतेनोक्त
नेवात्मा नामरूपविपरीतत्वात्तद्वाक्यमस्तीति पर्यायदप्रमति व्युक्तं जगदुपलब्धेः। तदसदि
वासीदस्यापि वाक्यस्य पर्यः॥ न निरर्थकमवस्तु कारणत्वेन कथ्यते असदेवेदमग्र आसीदित्यत्रा
पि तदेवयोजनात्तदासीदिति समाकर्षणं तदात्मानं स्वयमकुरुतेत्यत्रापि ईश्वरव्याकर्त्तृ
त्वस्यापि च कर्म कर्तृनिर्देशो दृश्यते॥ तस्माद्विरोधवचनं जगत्कारणमिति सिद्धं॥ यदुक्तं गति सा
मान्यादिति किं कारणमिति ब्रह्मणः कारणोविगानमिति विप्रतिपत्तिरन्ये स्वभिप्रायः॥ न विप्र
पद्यते हि सर्वस्याकाशादिविषयामपि विप्रतिपत्तिं निराकरिष्यति॥ जगद्वाचित्वात्॥ कौशीत
कि ब्राह्मणे बालाक्यजातशत्रुसंवादे श्रूयते॥ यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म ४९
स वै वेदितव्य इत्यत्र संदेहः किं मन्त्रप्राणो वेदितव्यत्वेनोपदिश्यते किं वा जीवः पर

मात्मेति। प्राणस्यैतत्कर्मेति तावत्प्राप्तं कर्मशब्दः क्रियावचनः सर्वा च क्रियावत्त्वाल्लिका
यविस्पन्दलक्षणश्च वायुः। तेन प्राणो गम्यते। धृतोनवाक्यैः पेनवाना किं नानिर्दिश्य पुरुषा या ए
ष आदित्ये पुरुषश्चन्द्रमसि पुरुष इति। ते प्राणपि वायुः कर्तोपपद्यते। श्रुत्यात्मनः प्राणस्याहि
प्राणोऽपि सर्वे देवताः कृतेत्यादि तिजीवो वावेदितव्यो यस्य चैतत्कर्मेति धर्माधर्मलक्षणं कर्म प्रसिद्धं त
च्छोगार्थं जगदुत्पद्यत इति वाजाकिना निर्दिष्टानां पुरुषाणामपि जीवः कर्ता कथं ध्रुवोपपद्यते त
स्मात् हितानाख्यायां वेदितव्य इति प्राप्ते निधीयते॥ परमेवात्र वेदितव्यं तमावक्ष्यते कथं पुनः कर्मे
ब्रह्मत्वेनोपचर्यते वा लोकिना ब्रह्मोपदेशे सतरेवाज्ञमुक्तो विपरीतकर्तृता न यस्य चैतत्कर्मे सन्नसमु
च्यते न प्राणो जीवो वा प्रकरणभावात् कर्मशब्दश्चैतत्शब्देन सन्निधमानः प्रत्यक्षादिप्रमाण
सिद्धं जगत्परामृशति क्रियत इति कर्मेति व्युत्पत्त्या तेन सर्ववाचे तेषां पुरुषाणां कर्ता ईश्वरः कर्तोप
पद्यते मानुगः वा शब्दस्य चायमर्थः किं विशिष्याभिधीयते यस्य चेदं कृत्स्नं कर्म सामान्येन
स वै वेदितव्य इति। किं न अजातशत्रुणा बालाकिमुपदिष्टं ब्रह्मप्रत्याख्यापतद्भिका विवक्षये इवाक
भवता दिति तस्मात्परविषयं निर्दिष्टं उपसंहारे च सर्वान्पाप्मनोऽपहत्य सर्वेषां च भूतानां श्रैष्ठ्यं स्वाराज्य
माधिपत्यं पर्येति य एवं वेदेति श्रुतिर्वेदानुपासनमित्युक्तं॥ अन्यार्थं तु जैमिनिः॥ प्रश्नव्या

मट॰ ख्यानाभ्यां। प्रश्नस्तावत् क्वैष बालाके पुरुषोऽशयिष्ट क्व वा एतदभूत् कुत एतदागादिति व्याख्यान
मपि यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन् प्राण एवैकधा भवत्येतस्मादात्मनः प्राणा यथायतनं वि
५० प्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका इति सुषुप्तकाले समस्तकरणग्रामेण सा संगत्यायं जीवो
ऽयं प्राज्ञात्मानुप्रविष्टस्तस्य संप्रसन्नः पुनर्भोगायागच्छति॥ सोयमीश्वरो च वेदितव्यो न जीवः
अपि चैवमेके वाजसनेयिनः एवमेवाधीयते। तत्रापि बालाक्यजातशत्रुसंवादरूपामाख्यायिकाम
वतार्य्य प्रतिवचने नवतोय एष विज्ञानमयः पुरुषः क्वैष तदाभूत् कुत एतदागादिति प्रश्नः प्रतिवचन
मपि य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेत इत्याकाशशब्दश्च ब्रह्मणि प्रयुक्तः दहरोऽस्मिन्नन्तरा
काश इत्यत्र ननु पुनरुक्तमिवाभाति नदोषः। न प्रतर्दने जीवमुख्यप्राणलिङ्गयो ब्रह्मोपल
क्षणार्थत्वं व्याख्यातमुपक्रमोपसंहारपर्य्यालोचनया त्रिविधमुपासनं तत्राश्रित्य इह तूपल
क्षणार्थमिति केचित्। अथवा तत्रोपलक्षणार्थत्वं तथापि विशेषाशंकाशक्यते दर्शयितुमु
क्तं तत्र वक्तुः सत्योपदेशात्मनैव परमात्मोपासनेऽभ्यासेन विज्ञानातीति वक्तुं तदेकवाक्यताच्चोत्तर
मपि ब्रह्मविषयं वाक्यजातमिह पुनरेवमाम्नायते इहो वाक्ये जातशत्रुः क्वैष एतद्बालाके पुरुषोऽश ५०
यिष्ट क्व वा एतदभूत्कुत एतदागादिति बालाकेर्न प्रति पन्ना स्वयमेवाजातशत्रुरुक्तमुक्तवान्। हि

ता नाम हिता नाड्यस्तासु तदा भवति। यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा
भवति। यास्सुषुप्ते देव वाक् सर्वैर्नामभिः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुध्यते। य
थाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा विप्रतिष्ठेरन्नेवमेतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठ
न्ते प्राणेभ्यो देवा देवेभ्यो लोका इति। नात्र परमात्मलिंगं विस्पष्टं कीर्त्यते ततो जीवमुख्यप्राणलिंगा
यो मुख्यत्वमेव युक्तं यस्य वै तत् कर्मेति च कर्मेति च कार्य्यशब्दः क्रियावचनः प्रसिद्धमिति समाधानं तु
जगद्वाचित्वात् कर्मशब्दस्य तदनुसारित्वाच्चोत्तरवाक्यप्रवृत्तेः प्राणशब्दः परमात्मपरो निश्चीयते। क्वए
तदागादिति कौलधिकरणवाचिनः परमात्मवाचित्वेन प्रयोगादाकाशे शेत इति च परमात्मनि स्वाप
संकीर्तनात्। सता सोम्य तदा संपन्नो भवतीति चातएव सर्वज्ञापरितोषात्परिहारान्तरं वक्तुमाह
अन्यार्थं तु जैमिनिरिति॥ वाक्यान्वयात्॥ बृहदारण्यके मैत्रेयीब्राह्मणे आम्नायते। न वा अरे पत्युः कामा
ये त्युपक्रम्य न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवत्यात्मा वा
अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या वि
ज्ञानेनेदं सर्वं विदितमिति तत्र संशयः किं विज्ञानात्मप्रतिपादनपरमिति किं वा परमात्मप्रतिपा
दनपरमिति। तत्र पूर्वपक्षवादी मन्यते विज्ञानात्मा प्रतिपाद्यते स दर्शनादिक्रियाविषयत्वेनोपदिश्य

भट.
५९
ते जायापुत्रवित्तादिभ्योऽप्यजातमात्मनः प्रियं भवतीति निर्दिशन् तथा विज्ञानघन एवैतेभ्यो भूतेभ्यः स
मुत्थाय तान्येवानु विनश्यति न प्रेत्य संज्ञास्तीति: समुत्थानवचनात् तथा विज्ञातारमरे केन विजानीयादिति
कर्तृवचनेनोपसंहारादेवं भात्येवमभिधीयते। परमात्मैव इह वचनात् तथा विज्ञातार्थनादि विषयो निर्दि
श्यते कुतो वाक्यान्वयात्॥ वाक्यं नामैकार्थप्रतिपादनपरं विभज्यमानसाकांक्षावत्पदपदगत
मुच्यते। तत्रोपक्रमोपसंहारयोः पर्य्यालोच्यमानस्य पदजातस्य परमात्मप्रतिपादनपरतयान्वया
वगमाद् अमृतत्वस्य नाशास्ति वित्तेनेति मेनामृतत्वप्राप्तिस्तदेव मे ब्रूहीति मैत्रेय्या यातनत्वेन:
प्रार्थितदर्थमात्मज्ञानमवतारयति स्म॥ तथात्मविज्ञानात्सर्वविज्ञानमुच्यमानं परमात्मनोऽन्यत्र नो
पपद्यते तथात्मवादिप्रपंचकर्तृत्वादिदोषं दर्शयति सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेति। तस्मात्तम
नोऽन्यतिरिक्तमिदं जगदिति देवधारणात्मपंचकारणं ब्रह्मीचात्मादि वक्तितदिति स्मृते इदं सर्वं यद
यमात्मेति चोपसंहारात्॥ अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादि वचनाच्च। प्रतिज्ञा
सिद्धेर्लिंगमाश्मरथ्यः जीवेनोपक्रमणं कथमिति तदुपपद्यमानार्थमाश्मरथः ते- आत्मनि विज्ञा
ते सर्वमिदं विज्ञातं भवतीति स्याः प्रतिज्ञायाः सिद्धेर्लिंगं गमकमेतत्॥ यस्मिया दिस्फुलिंगानामप्र ५९
नाणांतर सिद्धेन भोक्ता जीवेन वाक्योपक्रमणमिति आश्मरथ्यो मन्यते स्मयत्स्तत्त्विनो जीवन सिध्ये

त तस्मात्तदन्येदंशपक्षमाः कियानपि जीवपरयोर्भेदोऽस्तीत्यस्याभिप्रायः॥ उत्क्रमिष्यत एवं भावादित्यौ
डुलोमिः। जीवः परमात्मनोऽत्यन्तभिन्नः तस्य उत्क्रान्तिर्ध्यानध्यानसमाधिसम्पन्नस्य शरीरेन्द्रिय
संघातादुत्क्रमिष्यतो मुक्तपक्षस्य स्यायामेवैतावज्जीवोपक्रम इत्यौडुलोमिराचार्यो मन्यते स्म श्रु
तिरपि नदीदृष्टान्तेनेममर्थं ज्ञापयति यथा नद्यः स्यन्दमानाः समुद्रमानाः समुद्रे प्रतिष्ठां गच्छन्ति नामरू
पे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमिति॥ पांचरात्रिकाः अप्ये
वमाहुः॥ आमुक्तेर्भेद एव स्याज्जीवस्य च परस्य च परस्य च॥ मुक्तस्य च न भेदोऽस्ति भेदहेतोरभावत
इति॥ अवस्थितेरिति काशकृत्स्नः॥ न प्रकृतिविकारभावो नाप्यत्यन्तभिन्नस्य जीवस्य मुक्तस्य स्याया
मभेदापत्तिः किं तर्ह्युत्क्रमणाभावात् पिजीवरूपेण परमात्मनो व स्थानादभेदे नोपक्रम इति काशकृत्स्नो
मन्यते स्म। तथा च श्रुतिः॥ अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति परस्यैव जीवरूपे
णावस्थानं दर्शयति॥ १०॥ ननु यदि पर एव साक्षादयं न जीवो नाम स्यात्तर्हि उपदेशोऽनर्थको मैत्रे
य्याः स वा एष महानज आत्मेति न हि सर्वस्योपदेशप्रयोजनं॥ अत्रोच्यते। सम्यगाह भवा
न् स्तिभेदो व्यवहारिकोऽत्र अविद्याकर्मोपाध्यवच्छेदयोहि परस्याहं जीवो नाम। यथाग्नेर्विस्फुलिं
गाः यथाकाशस्य परिवाद्युपाधिस्थानोपाध्यवच्छिन्नः छिद्रप्रदेशः तदंशः शब्दग्रहणशक्तानेत्रो य
था च वायोः प्रतिशरीरं पंचवृत्तिः प्राणस्तथायं भिन्नाभिन्नस्वभावो जीवः संसारदिनकराश्चित्मुक्तः पर

मट॰
५२

वः॥ तस्य मुक्तस्यार्थविधोपदेशोऽर्थवान् संसारावस्थायां विविधवासनायोगात्परं श्रेयः प्रार्थयमानानां
जीवानामुपदेशः क्रियमाणोऽर्थवान् नैयायिकाः प्राहुः ननु मुक्तिप्रार्थनारागो रागश्च बंधनहेतुः क
थं मुक्तिः॥ अत्रोच्यते॥ रागो हि परमात्मविषयो यः स मुक्तिहेतुः विषयविषयो यः स बंधहेतुः शास्त्रा
द्यं विरागो गम्यते अथात्र काम्यमानो यो कामो निष्काम आत्मकाम इति। यथा स्वर्गार्थ्यागमवेन
मधुर्मा येति। ननु कर्मसहितं ज्ञानं यदि मुक्तिसाधनं ततः कर्मणि मुच्यमाने पुनःसंसारतवस्थः स्यात्॥
उच्यते॥ कोऽयं भवतः सम्मोहः को हि नाम नानुपरतबुद्धिः प्राप्तममृतमर्यादां तां त्यजित्वा मृगतृष्णामनु
धावेत्॥ मात्तत्त्व्याहि श्रुतिः श्रेयः श्राचयति। तदृशं कितेनोपादेयं अनंतानां च संस्कारकृतानां जी
वानामंतो नास्ति समुद्रोदकवत्॥ आत्मप्रमाणा एव मुक्तिर्दृश्यते॥ जगत्त्वानुच्छिन्नमवधार्यते॥ त
थाकाशांतरे किं चयो हि जगतः स्वरूपाप्तपलितासंहर्ता च स एव चिकित्सां वेत्स्यति। किं तया चिंतया
ति गंभीरयाः विरम्य मुक्त्येप्रयतस्वेति॥ केचिदन्यथा वादिनो ब्रुवते स एवेश्वरः सात्त्वादिदेहेष्वनु
प्रविश्याव स्थितः स एव न संसारी नान्यो तोऽस्यति रिक्तो जीवो नामेति। कथं तस्य संसारित्वमिति चे ५२
त्॥ अविद्याकृतनामरूपोपाधिवशादिति॥ तच्चाक्रम॥ कस्येयमविद्या न तावज्जीवस्य स्वयम्सत्त्वात्तस्य
तस्यानभ्युपगमात् नापीश्वरस्य नित्यविज्ञानप्रकाशत्वावश्यादज्ञानं विरुध्यते॥ यदि च संसारित्वं त
दीश्वरत्वं विरुध्यते॥ सुखदुःखमोहादिरहितत्वं हीश्वरत्वमुच्यते॥ तयोगी त्वं च संसारित्वं तदन्य

सारित्वासंसारित्वयोरविद्याविद्यात्वयोर्वंधमोक्षयोश्चैकस्मिन्नात्मनि समवायविरोधात्॥ शीतो
ष्णयोरिवान्यतरपरित्यागो वलात्प्राप्नोति ईश्वरश्चेन्न संसारी संसारी चेन्नेश्वर इति॥ श्रुतिश्चासं
सारित्वं दर्शयति निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं॥ अवद्यं निंद्यमुच्यते॥ अंजनमविद्या।
सा च जीवानां॥ अविद्यायामंतरे वर्तमाना इति श्रुतेः॥ तस्मादन्य ईश्वरस्तदंशो जीवः संसारीति वदंतः भुप
यं भवंति चात्र श्लोकाः॥ श्रवणं मननं ध्यानं ब्रह्मचर्यं शमादि च॥ अनपेक्ष्यमपोहेत साक्षाज्जीवपरीश्व
रः॥ विश्वरूपो यथा मायां नारदाय व्यदर्शनात्॥ उपक्रसंतवांस्तावत्स्वेच्छया भगवान्प्रभुः कानुदिश्य
स जेन्मायामयां तत्र राहन्यर्थिकां संसारितां कथं कुर्यादात्मानं स्वयमिच्छया॥ स्वयं निर्मितमायालावेदं
तत्रावलग्निना॥ ज्ञानं प्राप्नोति मुक्तार्थं सप्तज्ञितिकः क्रमः॥ सर्वोपाधिविनिर्मुक्तो युगपन्न हि संभवेत्॥
एकोपाधिविनिर्मुक्तो को लाभः परमात्मनः देहांतरेषु दुःखित्वं यदि वाभ्युपगम्यते॥ एकोपाधिनिवृ
त्यर्थः क्लेशस्तेनिष्प्रयोजनः॥ तेषु चेदास्ति दुःखित्वं क्लेशश्चैव निष्प्रयोजनः॥ तेषु चेदास्ति दुः
खित्वं क्लेशश्चैव निःप्रयोजनः॥ कृमिकीटाद्युपाधीनामनंतत्वान्नकर्तातस्मात्स्वतंत्रः सर्वज्ञः स
र्वशक्तिर्निरंजनः॥ ईश्वरोऽभ्युपगंतव्यो जगत्स्थितिलयप्रभो ते॥ अन्ये तु स्वयमुत्प्रेक्षितदर्शनाः आहुः
अपहतपाप्मादिरूपमात्मतत्त्वं कर्तव्यं श्रवणमननादिनियोगानुष्ठाने न सबनियोग प्रपंचप्रविला

न.ट.

५३ पन माधाद यतिस्वसिद्धार्थमेवेतितदेतद्ये शजपुक्तमस्माभिः॥ प्रपंचप्रविलापनमशक्यं वा।
पुरुषमात्रेणकर्त्तव्यमिति॥ यदि चात्मतत्वमप्रकृतपापत्वाद्विरूपंक्रियते। अनित्यत्वं प्राप्नोति घटा
दिवत्॥ न च प्रपंचप्रविलापवैने॥ अस्मिन्कृते वस्त्वंतरमात्मतत्वं भवति न हि प्रदीपेनांधकारा
लयेकृते घटः कृतो भवति। यथा वा घटस्य विनाशे कृते न घटविनाशः कृतो भवति॥ अर्थत्वात्। एवम
त्रापि॥ न च नियोगः प्रविलापनमापादयतीति शक्यते वक्तुं तस्याकारकत्वात् न च तस्य प्रविलयो
र्विभुतत्वादेतत्। यदुक्तं क्षितमात्मनातत्त्वं नियोगमस्तके ध्यारोप्यव्यवक्रियते यदि तावन्नियो
गः शब्दार्थको लिङ्गादिप्रत्ययः सपुरुषव्यापारकर्त्तव्यतामात्रेण प्रतिपादयति न तेन शुद्ध्यादिति। अ
थ प्रमेयरूपो नियोगः तस्य कागतिः स्वयं प्रमेयत्वात्। प्रमाणरूपता तस्य कल्पयितुमशक्या॥
प्रमाणाभावात्॥ यदप्युच्यते। प्रपंचस्य मिथ्यात्वमागमादवगम्यते॥ सत्यमेवतु। प्रत्यक्षादीनां प्रा
माण्यमिति। तदप्यसत् सर्वत्र हि परत एव मिथ्यात्वं गम्यते॥ न स्वतः। यथा शुक्तिकाज्ञाने न रजत ५३
ज्ञानस्य मिथ्यात्वं न तेनैव तस्य गम्यते॥ शास्त्रेणैव स्वपक्षादीनां मिथ्यात्वं प्रदिश्यते। तस्य वि
रुद्धत्वात्प्रपंचविमिथ्यात्वं सर्वदैवस्यात्॥ न विरुद्धविरुद्धये स्तयासत्वं मिथ्यात्वं वा। न हि पुरुषैर्भा
वाः क्रियंते येन तद्वशाद्भवतिस्थेरन्। इच्छारोहिते सस्या माज्ञाकेंद्रियसामग्र्यां दर्शनं मिथ्याख्यते॥ तदना

नेनास्तित्वमप्रतिप्रसंगे न च्छान्दोग्ये च तत्र तत्रानयोर्मायाप्रविलयप्रविलयनादिनोर्निराकरणं
विस्तरेण कृतमिति उपसंह्रियते। यदुक्तं विज्ञानघन एवैतेभ्योभूतेभ्य इति विज्ञानैकरसः शरीराकार
परिणतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुभूतानि विनश्यति। तत्कृतमौपाधिकं रूपं विजहातीत्यर्थः॥
प्रेत्य विशेषसंज्ञा निवर्त्तते। मुक्तः परमात्मा भवतीति समुदायार्थः विज्ञातारमिति विसर्वस्य विज्ञाता
रं परमात्मानं केनाप्यंतरेण करणेन वा विजानीयादित्यर्थः॥ न हि मुक्तावस्थायामात्मांतरं करणां
तरं चास्ति॥ प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधात्॥ उक्तं प्रधानं जगत्कारणं न भवति किंतु ब्रह्मैवेति। तत्रे
दमाक्षिप्यते। चेतनानामीश्वराणां राज्ञादीनां स्वतन्त्रमतीनां निमित्तकारणत्वमेव दृष्टं नोपादानकारणत्व
मचेतनानां तु मृदादीनां दृष्टं तच्च निरस्तं भवता॥ तदिदानीं वदादेवं स्यात्॥ अन्यथा सर्गानुपपत्तेर्वि
तिप्रासे सिधीयते॥ प्रकृतिरुपादानकारणं च शब्दान्निमित्तकारणं च॥ कुतः प्रतिज्ञादृष्टांतयोर
नुपरोधादवाधनात्॥ यदि ब्रह्मैवोपादानकारणं ततस्तदुक्तमुपपद्यते॥ उत तमादेशमप्राक्ष्यो
येनाश्रुतं श्रुतं। भवत्यमतं मतमविज्ञातं विज्ञातं भवतीति। यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्म
यं विज्ञातं भवतीति कार्यकारणयोरनन्यत्वात्कारणानुरूपमेव हि कार्यमितोवगतेहेतोः कार
णकार्यसारूप्येनावगतं भवतीति विज्ञानमस्ति। कार्यस्योत्पत्तेर्भूर्ध्व सा न प्रविलयः। तत्र यत्के
न चिदुक्तं प्रविलीयमानः प्रपंचो विज्ञातो भवतीति तत्स्वबुद्ध्योत्प्रेक्षितमिदं स्वपक्षलक्षणं। न चा

नुमानेनास्माभिर्जगत्कारणं वर्ण्यते । येन राजादिदृष्टांतमपेक्षामहे ॥ अभिध्योपदेशाच्च ॥ इतश्चो
भट. पादानं । तदैक्षत बहु स्यां प्रजायेयेति बहु स्यामिति संकल्पपूर्विका प्रवृत्तिरभिध्यानं ॥ साक्षाच्चो
भयाम्नानात् ॥ इतश्च सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंत आकाशं प्रत्यस्तं यंतीत्यु
५४ त्पत्तिप्रलययोराम्नानाधारश्च यदुत्पद्यते तत्रैव तत्र लीयते । यथा पृथिव्यां भूतग्रामः ॥ आत्मकृतेः
परिणामात् ॥ इतश्च तदात्मानं स्वयमकुरुतेत्यात्मनः कृतिः करणं कर्तृत्वेनात्मा निर्दिश्यते ॥
कथं पुनरात्मनः करणं संभवतीत्याह । परिणामादिति परमात्मा स्वयमात्मानं कार्यत्वेन परि
णामयामासेत्यर्थः । शक्तिविक्षेपं कृतवान् अनंता हि तस्य शक्तयो विद्यमाना तासां विक्षेपं करोति
सृष्टिस्थितिकाले यथा सूर्यो रश्मीनां तद्वदेव संहरति । तथा च मंत्रवर्णः । श्वेताश्वतराणां न तस्य
कार्यं करणं च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । परास्य शक्तिर्विविधैव श्रूयते स्वाभा
विकी ज्ञानबलक्रिया चेति । न तु चनजायते ॥ ज्ञो नित्य इति । तस्मात्स्वतंत्रस्य शक्तिविशेषोपसं
हारेण विरुद्धौ सत्त्वकारः क्षत्यनुकारी परिणामपदं सत्त्रयां वा भव । यमेव छांदोग्येवाक्यकारव
त्तिकारान्यांसंप्रदायात् ततः समाश्रितः । तथा च वाक्यं परिणामस्तु स्याद्दध्यादिवदिति विगीतं । ५४
विच्छिन्नमूलं माससाया निकरो दृष्टं धितं मायावादं श्रावणं जो जोक्रान व्याप्नोरुयंति । यो नि
श्च हि गीयते ॥ इति हेतौ कर्तारमीशं पुरुषं ब्रह्मयोनिमिति तथा यत्तद्भूतयोनिं निरूपा

दानकारणं पृथिवी यथौषधीनामिति दर्शनात् ॥ एतेन सर्वे व्याख्याता व्याख्याताः ॥ एतेन प्रधानवि
राकारणवादेन सर्वे परमाण्वादिकारणवादाहेयत्वव्याख्याता वेदितव्याः द्विरभ्यासोध्यायसमा
प्तिद्योतनाय ॥ २७ ॥ २८ ॥ ॥ इति शारीरकमीमांसाभाष्ये भगवद्भास्करप्रणीते प्रथमोऽध्यायः ॥ स्
मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात् ॥ प्रथमाध्याये सर्वज्ञं सर्व
शक्तिब्रह्म जगतः कारणमिति प्रतिपादितं स्मृतिन्यायविरोधपरिहारः परस्परं नानातर्कादास
विजृम्भितं च स्मृतीनां परस्परविप्रतिपत्तिसमाधानमित्यस्याध्यायजातस्य प्रतिपाद्यतार्थ इति
योध्याय आरभ्यते ॥ अत्र सांख्याः प्रत्यवतिष्ठन्ते यदि ब्रह्मैवोपादानकारणं निमित्तकारणं च ततः क
पिलमहर्षिप्रणीतप्रसिद्धं तंत्राख्यस्मृतेरनवकाशो निर्विषयत्वं स एव दोषस्तस्य प्रसंगोऽन्यासांस्मृ
तीनां तु धर्माधर्मप्रतिपादनार्थत्वात् आनर्थक्यं नास्ति । अस्यास्तु स्मृतेस्तत्त्वाववोधविषयत्वा
त्त्वसेनवेवाल्पमनवकाशत्वं तस्मात्प्रधानमेव जगदुपादानकारणमभ्युपगन्तव्यं श्वेताश्वत
रश्रुतिश्च कपिलमाहात्म्यं दर्शयति ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्ये
दिति तीर्थकरस्य कपिलमहर्षेः सम्यग्दर्शितवाक्यानुसारेणैव वेदांतार्थावधारणं कर्तव्यं न
स्वतंत्रतयेत्यभिप्रायः । एवं प्राप्ते प्रतिविधीयते । नैतदेवमन्यस्मृत्यनवकाशदोषप्रसंगादिति

ब्र॰
५५

स्मृतिबलेन प्रत्यवतिष्ठमानस्मृतिबलेन प्रत्यवतिष्ठमानस्मृतिबलेन प्रत्यवतिष्ठस्यास्मृतिब
लमेव दर्शनीयाभितिशास्त्रत्रारात्मात्कृतानां च क्षेत्रज्ञस्येति कथ्यते तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्वि
जसत्तमेतिहासे यत्र सर्वाणि भूताधिनव स्यादिपुराणगतमेयस्मिंश्च प्रलयं यान्ति पुनरेव युगक्ष
येऽव्ययः पितरो देवा महान्ति ताचि धातवः जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवं अहं सर्वस्य ज
गतः प्रभवः प्रलयस्तथेति गीता॥ यासामविरोधे च श्रुत्यनुसारिण्याः स्मृतिरूपादेयाग्रतो च चेतु
तुर्नञ्जगादीजमुक्तं लहि रुत्कास्मृतिच प्रमाणं तदुक्तं प्रमाणलक्षणे विरोधे त्वनपेक्षं स्यादसति ह्यनु
मानमिति श्रुतिस्मृतिविरोधे स्ये स्मृतिः कपिलस्येति स्थितं यत्पुनः श्रुतिरुदाहृता तत्र कपि
लशब्देन हिरण्यगर्भः स्वचित्समञ्जसा वक्ष्योपि धीयते कपिलवर्णत्वात्। तथा चोक्तं पुराणे
आदित्यसंख्याः कपिलो योऽग्रजोऽग्निरिति तस्यामेव प्रकृता चोक्तं हिरण्यगर्भो जनयामास पूर्वं म
नो बुध्या श्रुतपोसंयुत न्हि जिः न मुख्यपुरुषोपेक्षा प्रकृतेः। एवतः प्रामाण्यात् इतरेषां चानुपल
ब्धेः इतरेषां सांख्यस्मृतिर्नादर्तव्या प्रधानादितरेषां महदहंकारतन्मात्राणां लोकवेदयोरनुप
लब्धेमहाभूतप्रकृति चेन बुद्धिरन्तःकरणं तद्धर्मश्चाहङ्कारः प्रसिद्ध एवमेतेन योगः प्रत्युक्तः। ५५
इत्यतिदेशस्त्र मेतेन सांख्यस्मृतिप्रत्याख्यानेन योगस्मृतिरपि प्रत्युक्ता वेदितव्या ननु

चासाधारणांशं कार्यासादृश्यप्रतिपादनमतिदेशः। का उत्तम्याशंकेति तत्तदुक्तमतेऽप्युक्तो योगोऽपदे
शात् तं तत्संवादित्वात् प्रातंजलादीनां योगशास्त्राणां तदुपनिषदां प्रधानादीनामपि श्रोतत्व
प्रबुद्धिः कस्यचित्स्यात्तस्या निवृत्तिः देशेन व्यावर्त्यते। कः पुनर्वैदिको योगोपदेशः श्वेताश्वतरोपनिष
दि त्रिरुन्नतं स्थाप्य समं शरीरं हृदीन्द्रियाणि मनसा संनिवेश्य तथा पृथ्व्यप्तेजोऽनिलखे समु
त्थिते पंचात्मके योगगुणे प्रवृत्ते न तस्य रोगो न जरा न दुःखं प्राप्तस्य योगा
ग्निमयं शरीरं इति एवं तु श्रुतिसंवादात्। सम्यग्दर्शनोपायोपदेशांशस्य तथा च विप्रतिपन्नाः श्र
स्यात्॥ मध्यात्वं पुरुषाणाम्कल्पापर्दर्शितं च सम्भवात्। न विलक्षणत्वादस्य तथात्वं च शब्दात्
इत्याद्यस्मिन्पादे समासेनोक्तो वक्ष्यमाणेन सांख्यादीनां ... पस्तु समाधानं क्रियते ननु च चो
दनायाः एवतः प्रामाण्यात् कथं तर्कनिमित्तोऽप्यापेक्षः संभाव्येत अतो घटते सिद्धवस्तुविषयत्वाद्वे
दान्तानां तत्र च तर्कस्यावकाशेन दर्शनात् यथात्म्यानि सोनित्वो वेधि विचार्यं नित्यए नेत्तव्यो
यितेभ्युति श्चवत कानुप्रवेशं दर्शयति श्रोतव्यो मन्तव्य इति न चेतनं ब्रह्म जगत्कारणमुपपद्यते वि
लक्षणत्वादस्य कार्यस्य प्रकृतिधर्मानुविधायित्वे हि प्रकृतिविकारभावो दृष्टः सुवर्णकर
जवर्ययोर्न चेह कारणधर्मस्य चेतनस्याकाशादिषु वृत्तिर्दृश्यते नन्वयमसिद्धो हेतुर्ब्रह्म

भट॰
५६

कार्यत्वाच्च तद्धर्मानुवृत्तिं पाषाणादिषु मिमीमहे न नु च व्यपदेशश्रुतेरिन्द्रियविषयाणां चेतनत्वमनु
पगम्यते। तेषामपि देवतात्वाद्विवत् स्वतंत्रत्वात्। नोक्तदोषः योग्यत्वेनांगाङ्गिभावेन प्रतिपद्येत न नु च जडे
चैतन्यं ते नाप्रसिद्धं अत्रोच्यते। केचिदग्निमरुच्चैतन्याः केचिन्न निर्व्यूढचैतन्यास्तत्र गुणप्रधान
भावेन विरुध्येते अतएव नाप्रसिद्धिरुपपद्यते। अत्र अमोनलोष्टादीनां चैतन्यास्तित्वे प्रत्यक्षमनुमा
नं वा प्रमाणमस्ति। हिताहितप्रवृत्तिनिवृत्त्यदर्शनादि इमे वा चैतन्यं पदस्मृत्यादिवैलक्षण्यं तस्माद्
भिमानिचैतन्या लोष्टादय इति प्रतिज्ञामात्रमतः सिद्धो हेतुर्विलक्षणत्वादिति। किं च तथात्व
मचेतनत्वं च शब्दादेवगम्यते विज्ञानं चाविज्ञानं चेति ननु च मृदब्रवीदापोऽब्रुवंस्तन्नो जरोद्दालेति
च मृत्पाषाणामप्रसिद्धचैतन्यानामपि चैतन्यं श्रूयते नैतदेवं। अभिमानिव्यपदेशस्तु वि
शेषानुगताभ्यां अभिमानिन्यो देवतास्तत्र व्यपदिश्यन्ते। कथं गम्यते कौषीतकिनां देवताश
ब्देन विशेषणं एता ह वै देवता अहं श्रेयसे विवदमाना इति ता वा एता देवताः प्राणे निःश्रेयसं वि
दित्वेति। तथानुगतेश्चैतन्यं व्यपदेश्यते अग्निर्वाग्भूत्वा मुखं प्राविशद् वायुः प्राणो भूत्वा नासिके ५६
प्राविशदादित्यश्चक्षुर्भूत्वाक्षिणी प्राविशदितीन्द्रियेष्वनुगतां देवतां दर्शयति। पृथिव्यपि वीनवे
द्युपयोपेन विदुषेति चात पृथ्व्यभिमानिनालस्येदेपयिका हि नामभिमानिनीं देवतां दर्शयति। कथमन्तर्या

मिदं न जानातीति विशेषप्रतिषेधात्। तस्माद्विलक्षणत्वात् नेदं जगत्कारणमिति प्राप्ते अभिधीयते।
दृश्यते तु तुशब्दः पक्षं व्यावर्तयति सति सादृश्ये प्रकृतिविकारभावो सति पुनः सादृश्ये तस्याव
त्तिर्नैवं व्याप्तिः सिद्धा येन वैलक्षण्यं हेतुरुच्यते। असत्यपि वैलक्षण्ये दृश्यते कार्यकारणभावो यथा
मनुष्यादन्यात् केशलोमनखादि वैलक्षण्यं जायते गोमयाद्वृश्चिको जायते शालूकाद्वा कुकुरुण्डः छत्र
इति सर्वत्र साधर्म्यवैधर्म्ये च कार्यकारणविषये केनचिदंशेनास्तिः यदि च सर्वसादृश्यं स्यात्
प्रकृतेर्विकारभाव एव न स्याद् इति चाप्यापि केनचिदंशेन सादृश्यं आकाशादीनां कार्ये सत्तामात्रत्वा
दिधर्म्मानुवृत्तेस्तस्माद्विलक्षणत्वादित्ययं हेतुर्दुष्टं मन्तव्य इति। तर्कस्यानुप्रवेशं श्रुतिः आ
वपर्तीति नवीणाया अस्पाशु घतकोऽप्युज्जायते कं तर्कयोगमनुसादि यस्तर्कस्तदुपपत्त्यर्थं संप्र
त्यनुज्ञायत इति॥ असदिति चेन्न प्रतिषेधमात्रत्वात् शब्दस्पर्शादिहीनात् ब्रह्मणः शब्दस्पर्शादिमत्का
र्यं जायत इत्यसत्कार्यवादः प्रसज्यत इति चेन्नैतदेवं प्रतिषेधमात्रत्वात् सत्कार्यत्ववादस्य
प्रतिषेधमात्रमेतत् असत्कार्यवादस्तु प्रतिषिध्यते। यथा सत्कार्यं भवति तथा तद्दर्शनमस्य तु
त्तिप्रत्ययवदपादः। अपीतौ तद्वत्प्रसंगादसमंजसं यदि चेतनादचेतनं स्थूलमशुद्धं च कार्यं जा
यत इत्यभ्युपगम्यते। तस्यापीतौ प्रलयवेलायां तद्वत्प्रसंगाद्यथा कार्यं स्थूलमशुद्धं च तथा कार

पास्यापि प्रसज्यते । इत्यसमंजसमौपनिषदं दर्शनं ॥ इतश्चासमंजसं यत एव विभागप्राप्तानां
जीवानां पुनरुत्थाने मुक्तानामपि संसारप्रसंगः अपकारणे पि कार्य्यप्रपंचे यदावतिष्ठते तथा सत्य
पीतिरेव न स्यादित्यसमंजसं । ननु दृष्टांतभावात् । ननु तदसंगः कुतो दृष्टांतभावात् । यथा शरा
वादयो पीतिं गच्छन्तः स्वधर्मं हित्वाग्नौ क्रमापुंधृतेषु चलत्यदधवी विकाराः पृथिवीमपि गच्छन्तोऽव
ज्ञाद्योन तैलधर्मेण तद्दूषयंति । तथा प्रपंचः प्रविलीयमानः शक्त्यात्मना कारणमेवानुप्र
विशति । तथा व्रजत्वं ति प्रपंचो पंरूपं हित्वा तु नैव दूषयतीति । किंच वस्थो जलवत्सृष्टे तिमुक्तानां
नापुत्थानहेतुत्वं नास्ति इत्यतिरेकविधाकर्मत्वं व्याघ्रातिरेकेषु दृष्टिविरोधः स्वपक्षदोषा
च्चासौ रजस्य त्रिगुणस्यैव तन्मरूपं निरवद्यं प्रधानं कार्य्याकारेण परिणमत इति स्वपक्षस्तत्रा
प्यस्य दोषस्याविशेषात्यैकः पर्य्यनुयोक्तव्यः तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवम
प्यनिर्मोक्षप्रसंगः ॥ चार्योऽपि शब्दः तर्कस्यानवस्थानात् दृष्टांतदर्शनस्यासामंजस्यं किं
पुनरयं तर्को नाम प्रमाणानामनुग्राहक ऊहो नधिगततत्त्ववस्तुनिश्चि प्रमाणस्तत्परिज्ञान
प्रयोजनो यथात्मनि नित्यत्वानित्यत्वे संदिग्धे नेतत्वे प्रमाणसंवादान्नित्यत्वमनुजाना
ति । तद्स्य न वाच्यं नित्यत्वमुपेक्ष्यते । सोयं निरूपणात्मस्य स्तर्क इत्युच्यते ॥ तथा चन्या ५९

यसत्र मविज्ञाततत्त्वेर्थे कारणोपपत्तितः तत्वज्ञानार्थमूहस्तर्क इति ॥ ईदृशस्य तीर्थकरबुद्धि
वरूपादनवस्थानादेकेन कपिलेन कणभुजा वा तत्कालं नेष्टो व्यवस्थापितोऽर्थः सोन्येन प्रत्ति वि
ध्यते अर्थपरेण समर्थ्य इति परस्परविरोधान्न सम्यग्ज्ञानसिद्धिरपोच्यतामपाऽनवस्थान
नवति तथा तु नैयं जगत्कारणमनुपादिशि श्रह तुष्टिः प्रधान प्रतिष्ठाप्यतेन तत्रानवस्थोनत्वे
देवमपप्यनवस्थं स्यात् पादविमोऽ ज्ञात तत्कालीकथमत्यंतातींद्रियविषये साधर्म्यवैधर्म्या
भ्यां प्रत्यवस्थानासंभवान्नानुमानेनाभिप्रेतार्थसिद्धिः कस्यविद्धतः श्रुतिमूलकेन तु गद्धि
जावधारणमिति स्थितं ॥ एतेन शिष्टापरिग्रहा अपि व्याख्याताः एतेन प्रधानमनुनिबर्हणेन व्या
ये काने नाति निर्दिष्टयंते वैशेषिकाद्युक्तं ह्यपरिहृत्य प्रशक्तमपि तिः मालातिः कस्यचिद् प्रवृ
त्ते तेन प्रधानवाक्यतोत्तं प निराकरणेन शिष्टैर्मनुव्यासप्रभृतिभिः किंचिदपरिगृहीताः परमा
एवादिकारणवादा व्याख्याता निरस्ता वेदितव्याः परिग्रहशिष्टैः इति परिग्रहाशिष्टैः केन चिदंशे
नेन परिग्रहीताः इत्यर्थः ॥ भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत् ॥ अन्यथा पुनः दृष्यते ब्र
ह्मणेऽन्यत्वाऽद्भोक्त्रोग्य पोरविभागः कर्मणो तु जीवस्य भोग्यापत्ते भोग्यस्य च शरीरादि
पविषयलक्षणस्य भोक्त्रापत्तेरापत्तिरेकीभावः ततश्चासंमंजसं दर्शनं लोकप्रसिद्धिविना
ग परिलोपादिति चेदुच्यते । स्याल्लोकवदस्मत्पक्षेप्यनयोर्विभागः परमात्मना विभागो

लोके समुद्रेणानन्यत्वेऽपि फेनतरङ्गादीनां परस्परविभागो नाभेदापत्तिरेवमत्रापि स्यात् ॥ अभे
ब्र॰ नेदयोर्हि सर्वप्रमाणसिद्धत्वादुपपत्तिः तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ ब्रह्मणोऽनन्यत्वं भोग्यभो
५८ क्तृवर्गयोः सिद्धवत्कृत्वा विभागो वर्णितो ऽथेदानीमनन्यत्वमसिद्धमिति साध्यते ॥ अत्र वैशे
षिकाः प्राहुः कार्यकारणयोरत्यन्तभेदः कारणं मृत्पिण्डः शरावादिकार्यं भेदेनोपजायते कार्य
स्य चोदकाहरणादिकार्यं न मृत्पिण्डेन स्यात्तत्तयोर्भेदो ऽसत्कार्यमुत्पद्यत इति वैशेषिकामतं
ते तन्निराकरणमाह तयोरनन्यत्वमारम्भणशब्दादिभ्यः एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञापितं तत्सि
साधयिषया दृष्टान्त उपादीयते यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विका
रो नामधेयं मृत्तिकेत्येव सत्यमिति वाचा वागिन्द्रियस्योपयमारम्भणं विकारो नामधेयं च विकारो
ऽभिधेयोपपत्तिस्तदभिधेयं नामधेयं उभयमालम्ब्याय व्यवहारः प्रवर्तते घटेनोदकमाहरे
ति मृण्मयमपि तस्येदं व्याख्यानं पद्यन्त हि व्यवहारहेतुः कार्यं न तर्हि कार्यकारणयोरनन्यत्वमि
त्याशंक्याह मृत्तिकेत्येव सत्यमिति कारणमेव कार्यात्मनानवदवतिष्ठते मृत्तिकान्वितं हि का
र्यमुपलभ्यते निर्विकारणाधीनं कार्यं नाश्वमहिषवद्देशतः कालतो वा व्यतिरिक्तमुपलभ्य ५८
ते । कारणात्स्वात्मस्थात्मानं कार्यं व्यतिरिक्तो व्यतिरिक्तं शुक्तिरजतमायावद्धर्मितावान्त
मनित्यमिति चव्यपदिश्यते तदर्थमेव मृत्तिकेत्येव सत्यमिति सुक्तं प्रसन्तासिद्धमेव हि सत्

त्यमसि इन्द्रियतेन विधीयते दृष्टान्तत्वेनोपादानात् प्रमाणान्तरसिद्धो हि दृष्टान्तो भवति तथा वन्या च
सन्त्रं लौकिकपरीक्षकाणां यत्र बुद्धिसाम्यं स दृष्टान्त इति अपाणादेरनित्यत्वमिति च कारणा
त्मना निरीक्ष्यमाणं कार्यं व्यतिरिक्तं नोपलभ्यते कारणात्मनैव तिरोहितं भवति श्रुतिश्चायेण
उक्ते आदिशे नैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीत्येवं जातीयकं वचनं गृह्यते तथा
च श्रुत्यन्तरमात्मव्यतिरिक्तस्य प्रपञ्चस्यासत्यतां दर्शयति । अथ नामधेयं सत्यस्य सत्यमि
प्राणा वै सत्यं तेषामेष सत्यमितिप्रवृत्तिं चानृततत्त्वमपि प्रेयात् प्राणा असत्यमिति ब्रूयात् अनेकेऽपि
न्यायाबादमवलम्ब्यन्ते ॥ मृत्तिकेत्येव सत्यमित्यवधारणात् कारणमेव सत्यं कार्यमनृतमसत्य
मनादिकालप्रवृत्ताविद्यावलात् शास्त्रं ये भेदः प्रतिभासते न परमार्थतोऽस्ति यद्येवं प्रत्यक्षाप्रत्य
क्षादिप्रमाणव्यवहारः कथं वा विधिप्रतिषेधशास्त्राणामर्थवत्ता कथं वा मोक्षशास्त्रेणानन्ते
न ब्रह्मज्ञानमुत्पाद्यते इति नायं दोषो मिथ्यारूपोऽपि व्यवहारो बाधकप्रत्ययाभावाद्व्याहतः प्रव
र्तते प्रमाणानि मुख्यत्वादीन्यविद्यावद्विषयाणि न विरुध्यन्ते बाधकप्रत्ययमासाद्य निवर्तन्ते अ
तएवाविद्यावत्पुरुषविषयौ विधिप्रतिषेधावुपपन्नौ वस्तुतश्च सत्यत्वे तत्प्रतिपत्तिर्भ
विष्यति यथा स्वप्ने भुजङ्गादुत्पन्नसत्यवचनं निष्पद्यते । रेफश्च पारमार्थिकवर्णप्रतीतिरिति न च निर

भ० वयवस्यात्मनः परिणामोवकल्प्यते। तस्मान्मायामात्रमिदं प्रपंचजातमिति॥ अत्र ब्रूमो मन्ति केचेव
५८ सत्त्वमित्यस्यार्थो व्याख्यातो यदि च प्रपंचासत्त्वं मन्तिका अप्यसत्त्वं प्रपंचत्वात्। कथं
